त्रयम्यात्र संक्रांतिकाले सति ॥ पूर्वापरवाह्नोंतिम पूर्वभागयोः पूर्वापरयोरन्हे क्रमेणांतिम पूर्वभागयोरमय चषोड
श षोडश घटिका पुण्या इति संबंधः ॥ अथ यमर्थः ॥ यद्यर्धरात्रे संक्रांतिस्तदा पूर्वस्य दिनस्योत्तरार्द्धं पुण्यं ॥
यद्यर्द्धरात्रादुपरि संक्रांतिस्तदोत्तरदिनस्य पूर्वार्द्धमेक पुण्यमित्यर्थः ॥ अथार्द्धरात्रि संक्रमणे मकरकर्कटयोस्त्र
विशेषमनुपजातिकयाह ॥ श्लो० ॥ पूर्णे निशीथे यदि संक्रमः स्यात् दिनद्वयं पुण्यमथोदयास्तात् ॥ पूर्वं परस्ताद्यदि या
म्यसौम्यायने दिने पूर्वपरे तु पुण्ये ॥ टा०टी० ॥ पूर्णे निशीथे ॥ पूर्णे निशीथे अर्धरात्रे यदि संक्रमः स्यात्तदा दिनद्वयं पूर्वदिने परि
दिने च पुण्यमुक्तं ॥ उक्तं च ॥ यद्यर्द्धरात्रे एकस्यां त्वसौ संक्रमो रवेः ॥ तदा दिनद्वये पुण्यं स्नानदानादि कर्मसु ॥ अथे
ति अथानंतरम् उदयास्तात् सूर्योदयात् सूर्यास्ताच्च पूर्वं परस्ताच्च यदि याम्यसौम्यायने कर्कमकरसंक्रांती भवतः
तदा पूर्वे परे दिने पुण्ये स्याताम् ॥ अयमर्थः ॥ सूर्योदयात् पूर्वं कर्कसंक्रमणं स्यात् । तथा पूर्वदिन एव पुण्यकालो नेतर

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६४ दिने॥ तथा यदा सूर्योस्तमानंतरं मकरसंक्रांतिः स्यात्तदोत्तरदिनएव पुण्यकालो न पूर्वदिने॥ माधवः॥ यदास्तमतिवेलायां मकरं या
ति भास्करः॥ प्रदोषे वार्धरात्रे वा स्नानं दानं परेहनि॥ अर्धरात्रे तदूर्ध्वं वा संक्रांतौ दक्षिणायने॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते र
विरिति वाऽर्थः॥ पूर्णे निशीथे तिप्रदोषलक्षणं स्कंदे॥ त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सतीति॥ हे॥ अयोदयास्तादि ति
वचनस्यापवादमिदं वचनं याह॥ ज्यो॰॥ संध्या त्रिनाडी प्रमितार्कबिंबादर्धोदितास्तादध ऊर्ध्वमत्र॥ चेद्याम्यसौम्ये अयने क्रमा
त्तः पुण्यौ तदानीं परपूर्वपक्षौ॥७॥ टी॰॥ अर्कमंडलादर्धोदितादर्धास्ताद्वाध ऊर्ध्वं क्रमात्त्रिमितो नाडीमिता संध्याकालः
स्यात्॥ अर्धोदितार्कबिंबात्पूर्वं त्रिनाडीमितो प्रातःसंध्या यो च क्रमाद्याम्यसौम्यायने स्तः तदानीं पूर्वपरे दिवसौ
पुण्यौ यदि प्रातःसंध्यायां दक्षिणायनप्रवृत्तिस्तदा सूर्योदयानंतरं संपूर्णमहः पुण्यं तथा यदि सायंसंध्यायामुत्तरायणप्रवृत्ति
स्तदास्तात्पूर्वं संपूर्णमहः॥ पुण्यमित्यर्थः॥ अथाह नारदः॥ सूर्यास्तमनसंध्यायां यदि सौम्यायनं भवेत्॥ तत्तो
दयादहः पुण्यं पूर्वाह्णः पूर्वतो यदि इति॥ उदयसंध्यास्तमसंध्ययोर्लक्षणं स्कंदे॥ अर्द्धास्तमनात्संध्याघटिका
त्रयसंमिता॥ तथैवार्द्धोदयात्प्रातर्घटिकात्रयसंमितेति॥ एवं चात्रार्कबिंबस्यार्द्धास्तोदयात्क्रमात्॥ पश्चा
त्प्राकृत्रिघटीमिता॥ अस्तसंध्योदयसंध्या उच्यते॥ तथास्तमसंध्यायां यदि मकरसंक्रमः स्यात्तदा दिन एव पुण्यका ६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लोनोत्तरेह्नि इति निर्णयार्थः ॥ अपरार्द्धे स्नानं न कुर्वीत दानं चैव विशेषतः इति रात्रौ स्नानदानादि एव निषेधेपि नैमित्ति 125
कं तु कुर्वीत स्नानं दानं तथा श्राद्धमिति स्मृतेः तथा च स्मृत्यन्तरात् ॥ सुतजन्मने संक्रान्तौ ग्रहणे चेन्दुसूर्ययोः नित्यं रात्रावपि कर्तव्यं स्ना
नं दानं विशेषतः ॥ इत्यादिवचनात् ॥ राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ॥ स्नानदानादिकं कार्यं निशि
काम्यव्रतेषु चेति ॥ रात्रौ संक्रमणे सत्यौ स्नाने प्राप्ते ॥ तत्कर्ममकरसंक्रान्तावेव कार्यं स्नानं दानं ग्रहणवत् ॥ सौम्याय
नह्यय इति कश्यपकारिका स्वरसात् ॥ तथा मकरकर्कसंक्रान्तौ दानस्नानादेः देशप्रसिद्धाचारेण व्यवस्थावगन्त
व्या ॥ तत्र गौडैरास्तु ग्रहणवद्धर्म इति स्वीयसूत्रे ॥ स्नानं दानं ग्रहणवत्सौम्ययाम्यायनद्वय इति ॥ कश्यपसंहितोक्तं चानु
सत्य रात्रावदानसंभवे सति ॥ रात्रावेव स्नानादिकं कुर्वन्ति ॥ दाक्षिणात्यास्तु ॥ कामं कं तु पादिकोप्युत्कर्षे याति दिवाकरे द
सादिमविष्योत्तरादिवाक्यमेंगीकृत्य दिवस एव स्नानादिकं कुर्वन्ति ॥ तत्रापि नारदोक्तसंध्याकालसंक्रमे विशेषो
ध्येयः सकलम् ॥ ७ ॥ अथ पूर्वापराः षोडश घटिकाः पुण्या इति पूर्वं सामान्येनोक्तं मिथुनादिषु विशेषमनुस्मार
स्मो ॥ याम्यायने विष्णुपदे चाद्या मध्यास्तु तुलाजयोः ॥ षडशीत्यानने सौम्ये परा नाड्योतिपुण्यदाः ॥ १८ ॥ याम्यायने
ति ॥ कर्कसंक्रान्तौ विष्णुपदे वृषसिंहवृश्चिककुंभसंक्रान्तौ मिथुनसंक्रमकालाद्राद्याः ॥ प्रथमाः षोडश घटिकाः अति
पुण्यदाः अतिमासस्तु तथा ॥ तुलाजयोस्तु लाभेवयोर्मध्यांशे उभयतः षोडश घटिकाः संक्रान्तिकालाद्वागुपरतश्च

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

126

६५ दाविति दीपिकाकारो व्याख्यातवान्॥ यत्तु कर्कं गुरुत्वं। वर्नी मानेन तुला मेषे नाडीस्पष्टभुजमयनतो वशो तिमध्यमत्वती यो ग्राम्यिप्रायेणेति स्वेप
तथा षडशीत्या ननेमिथुनकन्या धनुर्मीन संक्रांतिषु सौम्यायने मकरसंक्रांतौ संक्रांतिकालात्पराश्च निमाः षोडशघटिका
अतिपुण्याः प्रथमास्तु न तथा एवं विनीतेपुण्यकाले स्नानादय व ग्रंथे स्वयं स्नानादय कुर्वतः प्रत्यवायमाह॥ वसिष्ठः॥
विषुवत्ययने ग्रहणे संक्रांतौ पुण्यदिवसे वा॥ पितरनिति न करोति इत्वा प्राप्य वज्र जातितस्य पिता॥ षडशीत्यनु पतने
दा चैनं च विषुव द्वये॥ इत्यपते सागरस्यां नक्त स्यां सोमे व इत्यते इति मार्कडेनोक्ते॥ अयं च निर्णयः स्मृत्यर्थसारादौ नामपि संक्र
मे ज्ञेयः॥ तत्र हेमाद्यादौ काल निर्णय कारादिभिर्योः पुण्यकालघटिका उपनिबध्यास्ताः॥ स्थूलाः तेन वशिष्ठप्र वि
वे न रमति अक मिन्यादि प्रकारेण॥ यस्मध्यमभुक्तिमध्यमविशेषानीताः॥ सूक्ष्मा घटिकालिरवने स्फुटगति
विशेषेत्साध्ये तेलाग्न्यति सूक्ष्मा स्नासमनि यत त्वात् श्लोके अनुपवक्ताः मध्यमास्तु यथा नाडीवोरामगुणा ३३ रवे
रथ विधोः षट् होः वस्त्रेर्धुगद्वये २।१६॥ सौम्य स्याधिपते पुत्रानन्दाः ५॥ विदोष्ठ्काः पक्ष्ये रसा ब्धिविर्द्धिः ... ६।१२।९
गजा ८८ गुरोरथ मगोनंदापलैरछिन्नि: ५।८ भृगवोः स्युः रवनपाः १६ यामेरुमयतोशाव पहयोः संक्रमे इति। निरयने
... संक्रांतिमभिधाय दानीं सायनांश संक्रांतिसपुण्यकालमुपजीत्याह॥ श्लो॥ तथा प्रयनांशस्वरसाहतायच्च राषा
केगत्वा विहताहिनाद्यैः॥ मेषादितः प्राकृत चलसंक्रमाः स्युर्दोने न यादौ च हुपुण्यदा स्युः॥ ४॥ टी॥ तथेति॥ यथा

६५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राशिसंक्रमाद्बहुपुण्यदास्तथा चलसंक्रमा अपीति व्यवहितिस्तथा शङ्कः। अयनांशः वसिष्ठगुप्ताः सह सूर्यगत्या विहि
तालब्धैर्दिनाद्यैर्दिनद्यतीव संक्रान्त्यामेषादिद्वादशसंक्रान्तिकालात्प्राक् चलसंक्रमाः स्युस्ते चलसंक्रमा दानेजपादौजप
श्राद्धहोमादौ च बहुपुण्यदाः॥ पुलस्त्यः॥ अयनांशसंस्कृतो भानुर्योऽसौ च राशिसंक्रान्तिः सदा॥ अन्यराश्या राशौ संक्रान्तिः स्युस्तत्स्व: 127
काले विधिस्तथा। स्नानदानजपश्राद्धव्रतहोमादिकर्मभिः सुकृतं चलसंक्रान्तौ बहुलं पुरुषो लभते॥ जाबालः
त्विा॥ संक्रान्तिपुण्यकालस्तु दीयेऽप्ययनेतथा॥ अयने विंशतिः पूर्वा मकरे विंशतिः परा॥ इति॥ अत्र मकरायने पूर्वा विंशति घ
टिकाः पुण्याः मकरसंक्रान्तौ तु परा विंशतिघटिकाः पुण्यकालः मकरव्यतिरिक्ते कर्कटादिसंक्रान्तिषु तत्संक्रमात्पुण्यकालोऽल्प
पः। अयनांशानयनादिविचारः॥ सिद्धान्तादवगन्तव्यः॥ द्वयोरेकालोकादशवशात्तनं द्रष्टव्यादि भागस्य सूर्य तेजः॥ एवं के
वलसंक्रमः मंडलसंक्रमः राशिसंक्रम इति विषयविवेकः॥ तत्र निरयणं दृग्गणितैक्ये वसकलव्यवहारः साध्यः साय
नराशिनां तु निरयणं तु विषये वा अयनांशः॥ प्रदत्तव्यालग्ने संक्रान्तौ च यामगमे विदिक्ते नेस त्रिमेषि – ते तथा द्वकर्मयानयोरिति
एवं द्वयोरपि मानयोः संकीर्णो व्यवहार इति सर्वमनाकुलं॥ पुण्यकालस्तु पवित्रिसंक्रमे ज्ञेयः॥ पूर्वं लिखितवाक्यस्व
रसात्॥ ९॥ अथ संक्रान्तौ तु पुण्यकाला॥ जघन्यव्रहत्सम नक्षत्राणि पञ्च स्वाहा॥ श्लो०॥ सममर्द्धुसितिवसुस्त्रनो निमघात्रि
द्वयोत्तरपमं अत्रत्रपमं मूलं॥ एतानि पंचदशभानि समर्से स्वासेयानि॥ ध्रुववृद्धेदेवादितिमव वृहस्पात्॥ संप्रीवु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पार्श्वे तिलशाकयामं जघन्यभं स्यात्॥ ध्रुवविह्निदैवादितिभे जघन्यं सार्पेंद्रु पार्श्वे तिलशाकं॥१॥ मृडुक्षिप्रचरभुजगवोन्निमघा
त्रिध्रुवोस्त्रपमं। अस्यपमं मूलं एतानि वेचद्वशामानि समसे सार्धे यानि॥२॥ अथ चन्द्रसाम्ययोजनमुपेंद्रवज्रयाह॥ श्लो॥
जघन्यभेसंक्रमणे मुहूर्ताः स्वरेंद्ववो बाणकृता बृहत्सु॥ खरामसंख्या समभे महार्घं साम्यं विधुदर्शने धि॥२॥ टी॥ जघ
न्यनक्षत्रेऽर्कसंक्रमणे पंचदश मुहूर्ता ज्ञेयाः॥ समनक्षत्रेऽर्कसंक्रमणे खरामसंख्या त्रिंशन्मुहूर्ताः ज्ञेयाः॥ बृहन्नक्षत्रे
ऽर्कसंक्रमणे पंचचत्वारिंशन्मुहूर्ता ज्ञेयाः॥ उक्तं च नारदेन॥ नासां प्रमाणं घटिकास्त्रिंशत्र्चवतिबृहपड्
तिफलमासः॥ महार्घं समर्घं साम्यमिति पंचदशमुहूर्ता यां संक्रांतौ सर्वमन्नं महार्घं दुष्प्राप्यं भवति॥ पंचचत्वारिंशन्मु
हूर्तसंक्रांतौ सर्वमन्नं समर्घं त्रिंशन्मुहूर्ता यां संक्रांतौ समं यथा स्थितं भवति॥ विधुदर्शने धीति। चंद्रदर्शनेप्येवमे
व फलं वाच्यं॥ अथ मर्थः॥ जघन्यभे चंद्रदर्शने महार्घं बृहन्नक्षत्रे चंद्रदर्शने समर्घं समभे चंद्रदर्शने साम्यं॥२॥
अथ प्रसंगात्कर्कसंक्रांतौ मेघविशोपकानुष्टुभाह॥ श्लो॥ अर्कादिवारे संक्रांतौ कर्कस्याब्दविशोपकाः॥ दि
शोनखगजाः॥ सूर्याद्युत्पोदशसायकाः॥१३॥ टी॥ अर्कादिवारेति॥ कर्कसंक्रांतौ॥ अर्कादिवारे सति एते अब्दवि
शोपकाः॥ ज्ञेयाः॥ यथा रविवारे कर्कसंक्रांतौ दशविशोपकाः॥ एवं सोमे विंशतिः॥ भौमे अष्टौ गुरौ दश गुरौ त्रयोदश शुक्रे
दश भृगौ ... दशशनौ पंचदश॥ अथ कीदृशस्य रवेः संक्रमो जातस्य फलं मिंद्रवज्रयाह॥ श्लो॥ स्यात्तैतरे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नागचतुष्पदे रविः। सुप्तो निविष्टः गवादिषु चके। किंस्तुघ्ने ऊर्ध्वः पाशनौ स कौलवे निषण्णः समः श्रेष्ठ इहार्घवर्णे॥१८॥ स्यात्तैति-
लेति। रविसंक्रान्तेन नागकरणे चतुष्पदे च करणे सुप्तः संक्रमितः स्यात्। इह कण्ठकरणाद्येकं करणाक संक्रान्तौ रविः ऊर्ध्ववर्णेऽग्र-
र्घं मूल्यवर्धे ... समः श्रेष्ठः स्यादयमर्थः। सुप्तरविसंक्रमोऽर्घवर्णे धान्यस्य नि- 129
षः। ... धान्यानां भवकारकः। एवं निविष्टः समः। तथोर्ध्वः श्रेष्ठः उक्तं च। श्रीपतिना धान्यार्के रविषु भवे-
त् ... मस्त्वनिषण्णे प्रतेति॥१९॥ अथ रविसंक्रान्तेः करणपरत्वेन वाहनवस्त्रायुधभक्षलेपनजातिपुष्पाणि सफ-
लानि शार्दूलविक्रीडितवृत्तेनोपजातिकया चाह॥ श्लो॰॥ सिंहव्याघ्रवराहरासभगजा वाहा द्विपघोटकाः॥ श्वापो
लानिशार्दूलविक्रीडितवृत्तेन ... चित्रं केवलदिग्घना
... वाहा रवेः संक्रमे॥ वस्त्रं श्वेतसुपीतहरितपाण्डुरक्तकालासितं॥ चित्रं केवलदिग्घना-
म्बरमायुधं च भुशुण्डी गदा॥२०॥ खड्गो दण्डशरासनोमरकम्पाकुन्तपाशाङ्कुशा बाणः स्याद्दयपाममसमन्नं भेद्यकान्नकं
दुग्धं दधि विचित्रितान्नगुडमध्वाज्यं तथा शर्करा॥ ... लेपो मृगनाभिकुङ्कुमपयःपाटीरमृद्रोचना॥२१॥ सिंहेति॥ रव-
रेति। बवतो बवमारभ्य एकादश करणेषु क्रमेण वाहनादीनि स्युः॥ वाहना सिंहादीनि रासभगर्दभः॥ वाहा द्विप-
महिषः ... वल्लीको महिषो वाहः द्विपः लक्खा सरसेरमाइत्यमरः॥ अजो मेषः॥ वरणायुधः कुक्कुटः॥ नारदेन विशेष
उक्तः॥ खरान्हीकवेगे संक्रान्तेर्धिमवाहने॥ अन्यतिथ्यर्द्धवाहनास्युर्वे ... दयदति॥ प्राप्तिन्यायदासंक्रान्ति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६२ स्नानाग्निनां योऽस्य हस्तं दिशाहने स्यात् ॥ वशादिदेशेषु ॥ एवं सर्वत्र नलानेषु । अथ वस्त्रे घ्नेतादिहारितेनीलवर्णेषु । अप्रक 130
मु. लवणः । अथ स्त्रे मञ्जरी पानिलिंगा पृथ्वीपत्रसिक्ता नि ॥ अथ मत्स्यो ॥ अत्रेमलः परमान्ने पायसं मैरेयं सिसमूहः प
कान्नं मद्यं वादिविचित्रान्ने हरिद्रादिरंजिते ॥ अथ लेपो विलेपने । मृगनाभिः कस्तूरी कुंकुमं केसरं पाटीरं चंद
ने ॥ मलयसिक्तवोचनं गोरोचनमिति ॥ ५ ॥ पावकोऽनुमले निर्गोजनमप्येकालागुरुमध्ये द्रको । जातिदैवतम
नसर्पविहगः पुष्पे शाविशालतः ॥ लतावैरूपकमध्ये संकरमवायुध्ये च पुन्नागकं ॥ जाती वाकुलकेतकानि च तथा
विल्वार्कि दूर्वा बन्धुजे ॥ २८ ॥ सान्मालिकापाटलिका जपा च सेफोति वस्त्राशानवाहनादेः ॥ नाशात्सुतदन्म पजीवि
नो चाश्चिनो पवित्र स्वपतीचनाम्नः ॥ २७ ॥ पावकोऽग्निः ॥ स्यान्मलकेतिनी ॥ पावोऽम्लकः । ओतुम्बरोऽग्नेरघम
मह्यो जनादिरितिनिशा हरिद्रा ॥ श्रीजलकल्लो ॥ कालागुरुविशेषः । चंद्रकः कर्पूरः ॥ अथ जातिः । संकर
मवाश्च अनुलोमजाः प्रतिलोमजाश्च ॥ अथ पुष्पं ॥ पुन्नागं नागकेसरपुष्पं । मल्लिका । बेलिः ॥ जपा ओड्रपुष्पं ज्ञा
सवने । शेषाणि प्रसिद्धानि सर्वाणि कचिद्यो पुष्पं । शिग्रुः कुमारस्त्वगनालकाष्ठवा प्रोगभ्रालता ॥ ततस्त्रव
ह्रा ॥ वेष्यातिवं ध्याचस्तुनाथे मीनग्रवाजिकाचेति ववादिकानामिति ॥ एवं संक्रमकालेयानि वस्त्राशान
वाहनादेस्यमिहिनानिग्राविशावेनाप्रधलेपनजातिपुष्पाणि ॥ तेषां नामानि मवेन्ना । चपुनःसनदस्तुपजीविनं
६२

नाशोभवेत्॥ स्थितोयदिस्वपतौचस्वातैलिलेइत्यादिनाशुभनाडीन्युक्तानितद्गुणैर्विशिष्टानांनाशःस्यादित्यर्थः
अथसंक्रांतिवशेनयात्रिमनुष्यस्याशुभमशुभजन्यमाह॥ श्लो०॥ संक्रांतिधिष्ण्यमारभ्यधिष्ण्यतस्त्रिभेस्वभेनिरुक्तंग
मनंतनोगमे॥ सुखेत्रिभेपीडनमंगमेपकंत्रिभेथहानीदसभेधनागमश्च॥२८॥ संक्रांतियस्मिन्नक्षत्रेस्यात्तन्नेध 131
रभ्यस्वपूर्वनक्षत्रंतस्मात्स्वजन्मनक्षत्रंगणयेत्॥ तत्रैवस्वप्रथमत्रिभेभवतितदागमनेयात्रास्यात्॥ ततःप्रथमत्रि
कादनंतरंत्रिभेयदिस्युर्नक्षत्राणियदिस्वभंभवतितदासुखनत्रिभेशरीरपीडनं।पुनस्त्रिभेगमेधनकंवस्तुप्राप्तिस्ततस्त्रि
भेस्वभेऽर्थहानिः॥ ततःदसभेस्वभेधनागमःस्यात्॥ अथगमनदायांसंक्रांतौदानमाह॥ नावदाना॥ तिलोपरिलि
खेद्यंत्रंत्रिमूलेचत्रिकोणकं॥ तत्रहेमंविनिक्षिप्यदद्याद्दोषापनुत्तये॥२९॥ अथकार्येविशेषवस्त्रहविप्रादव
लंसामान्यतोग्रहवलंचोपजात्याह॥ श्लो०॥ नृपेक्षणंसर्वकृतिश्चसेगरेः॥ शास्त्रंविवाहेगमदीक्षणेरवेः॥ वी
र्येपतत्ताराबलतःक्रमोविधुर्विधोर्बलेकौर्कबलेकुजादयः॥२९॥ टी०॥ रवेरिति॥ नृपालोपेक्षंचसौरवेरारम्य
गस्वेवलेसतिएतानिकार्याणि॥ यस्यारवेर्वलेवाहेवान्पेक्षणं॥ चंद्रेसर्वकृतिःसौम्येसंगरः॥ गुरौशास्त्रस
ध्येयनाध्यापनंवा गुरौविवाहः॥ शुक्रेगमनं॥ शनौदीक्षणंयस्यदीक्षाविधेयेति॥ अथेति॥ ताराबलतोविधुःक्रमः
यदाचंद्रसेक्रमेणस्यात्तदाताराबलेचेत्तदासमपादद्दिनहृयेचेत्तद्ग्रहक्रमोपिक्रमःपादेक्रमोप्यक्रमः॥ एवंविधोर्व

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६८ लादिविसंक्रमणेऽशुभो दिवि मासः पर्यन्तेः शुभः ॥ शुभमस्तु सुतरां सूर्यस्य चनः ॥ एवं चंद्रहरौ शौ शुभो दिवि रविः शुभं इत्यर्थः ॥ यदा मौ 132
मायद्वयः संक्रांतिचिकीर्षवस्तु फलतः ॥ सूर्यवलादशुभमा० अपि शुभान्वेषकः ॥ रविदेशे तु शुभमासे अपि अशुभाः ॥ अथा
धिमासक्षयमासयोर्लक्षणमुपजात्याह ॥ श्लो० ॥ स्पष्टार्कसंक्रांतिविहीन उक्तो मासोऽधिमासः क्षयमासकस्तु
द्विसंक्रमात्तत्र विभागयोः स्यात्तिथ्यैर्हि मासोऽयमोत्यसंज्ञो ॥ ५८ ॥ टी० ॥ स्पष्टार्केति ॥ शुक्लप्रतिपदादि दर्शान्त
श्चान्द्रो मासस्तत्र चेत्स्पष्टसूर्यसंक्रान्त्या विहीनो दहिमवेन्तदाधिमास उक्तः चान्द्रो मासोऽसंक्रान्तो मलमासः प्रकीर्ति
त इति ब्रह्मसिद्धान्तोक्तविशेषे । कदाचित्सचान्द्रो मासो द्विसंक्रमः ॥ द्वौ संक्रमौ यस्मिन् सो द्विसंक्रमः स्पष्टसूर्य
संक्रान्तिद्वययुतस्तदा क्षयमाससंज्ञकउक्तः ॥ अथ तद्दर्शयोर्मध्ये भानोरेव तयोर्यदा । संक्रान्तिद्वितये चेत्स्या
न्न्यूनयामासः स उच्यते ॥ इति वशिष्ठोक्तेः ॥ तत्र क्षयमासे जातानां मृतानां च पूर्वमासे वर्द्धयनं श्राद्धं च विधेयम्
न तु तत्र कर्म विधेयम् ॥ तिथ्यर्द्धे प्रथमे पूर्वो परस्मिन्यथा ॥ मासस्य विनिवृत्तेषु क्षयमासस्य मध्यगो इति ॥ मासादि
लक्षणभेदविचारस्तु ग्रन्थगौरवभयान्नाभिहितः ॥ ५९ ॥ इति श्रीमुहूर्तचिन्तामणिदीपिकायां संक्रान्तिप्रकर
णं समाप्तम् ॥ अथ गोचरप्रकरणं व्याख्यायते ॥ तत्र जन्मराशेः सकाशात् ग्रहाणां चारवशेन शुभाशुभफलं ६८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नक्षत्रगोचरफलमित्युच्यते॥ तत्र रविचंद्रयोर्गोचरफलमुपजातिकयाह॥ श्लो०॥ सूर्यो ३ स्तां ६ त्ये ११ स्व १० व ३ युगे ४ ऽदि १ रंध्रे ८ दे ९ स्ति

वा ११ स्तयो ५ र्मै मध्यानीतमथ्य॥ रसां क यो लाभ शरेषु ष्णे त्ये चंद्रो वरा ३ घौ ४ गुण ३ रंध्रे द यो ९ ष्व॥ ११ ॥ श्लो० ॥ सूर्येति॥ ३॥ स्ते

त्ये ६ त्या दौ समाहार द्वंद्वः॥ शिवा ११ इयो रित्यादावितरेतरयोगः॥ ग्नें वराविल्यादा व नित्यमागमशासनमिति नुमभावो

ध्येयः॥ एवं सर्वत्र स्वजन्मराशेरिति पंचपश्लोकस्य त्राध्याहार्यो॥ ततः सूर्यः क्रमादुक्तस्थानेषु शुभो विद्धस्थानात्॥ सूर्यः जन्म

राशेः सकाशात् ष्टस्थाने शुभः यदि तत एव जन्मराशेर्द्वादशस्थाने न्येग्रहाः स्युस्तदा॥ विद्धः सूर्यः शुभो प्यशुभफलदाता॥ गुत्रस्थानेः

सूर्यपुत्रत्वात द्वैधोऽनंगीकृतः॥ यतः पितृजेन कस्य सुतवेधिर्न वेधं नाकुः॥ तथा द्वादशे जन्मराशेः सूर्यः स्वपुगे शुभस्थेन॥ च

तुर्थस्थाने स्थिताः शनिवर्जिता अन्ये ग्रहाः स्युस्तदा विद्ध एव॥ इत्येवं श्लोकत्रयेऽसम्यग्र्थोरव्येयं तथाग्निनंदे तृतीयनवमयोः

शिवास्तयोः पंचमैकादशयोः क्रमाच्छुभो विद्धः श्लोकस्य॥ मौ मेलि॥ मौ मध्यानीतमौ रा ३ ष्वे तेत्रयो विजन्मराशितः रसां क

यो लाभ शरेषु ष्णे त्येक्रमाच्छुभा विद्धाश्चेत्युर्थः॥ परंतु स्थानेः सूर्ये विद्धौ नौ सौ त्युक्तं प्राकु॥ चंद्रो वराद्यौ इसग्रे॥ ग्रथ चंद्र इति

जन्मभानु॥ ग्नें वराद्यौ ० ॥ गुणरंध्रे द यो ३।७।३ उपजातिकं इंद्रवज्रा भ्यामुपजातिकाधेनुवुधगुरुशुक्राणां गोचरफलमाह॥ श्लो०

लाभा ष्टमेज्ञा घरारेरसां त्ये नग ह्य सो द्विशरे विधराम्॥ रसां क यो नाग विधौ स्वनालाभ व्यये देव गुरुः शरा ध्यौ॥ ध्यंते न वां शे

द्विगुणे शिवा हौ शुक्रः कुनागे द्विनगे ग्नि रूपे॥ वेदा वरेदे व नि धौ गजे धौ नंदे शयोर्जानुरसे शिवाग्नौ॥ ३।७।१।० ॥ लाभा १

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

133

६९ मे ११।८ अथ चारे २।५ वसंते ६।११ नगहये ७।१२ चंद्रः क्रमाच्छुभो विद्धस्त्वसेयाः। चंद्रस्य बुधवेधो नास्ति। अथ पत्नद्द विह्निशरे २।५ 134
मु.टी. अक्षिरामे ४।३ रसांकयोः ६।९ नागविधौ ८।१ स्वनागे २।८ रामभेषे ३।१२ सौम्यः क्रमाच्छुभो विद्धस्त्वसेयः। अत्र चंद्रवेधो
नास्ति। अथ देवगुरुरिति। जन्मभात्। बाणाब्धौ ५।४ द्व्यंते रदरे नवांके ९।१० अद्रिगुणे ७।३ शिवाहौ ११।८ गुरुः क्रमाच्छुभो वि
द्धस्त्वसेयः। अथ शुक्र इति॥ जन्मराशेः सकाशात् कुनागे १।८ हिनगे २।७ अग्निरूपे ३।१ वेदांबरे ४।१० पंचविधौ ५।९ ग
जेषौ ८।५ नंदेशयोः ९।११ भानुरसे १२।६ शिवाग्नौ ११।३ शुक्रः क्रमाच्छुभो विद्धस्त्वसेयः॥ अथ वेदतात्पर्यं सूर्यादिः स्वोत्वे इत्या
दि प्राक् कथितस्थाने शुभविधायकाः सत्येग्रहे शुभप्रदे नदनेतर पठितस्थाने स्थिते शुभफलदाता। अयोदेवानुक्तस्था
नेषु न शुभो नाप्यशुभ इति अथ वामवेधं सूत्रमपेते चंद्रवलं चापजात्यर्द्धन्नाह। श्लोक॥ क्रमाच्छुभो विद्ध इति ग्रहः स्या
दितिः सुतस्थानं गवेधमाहुः॥ दुष्टोपि खेटो विपरीतवेधाच्छुभो द्विकोणे शुभदः सितेंदुः॥४॥ टी॰॥ दुष्टोपि जन्मराशेः स
काशाद् नेतरे पठित विरुद्धस्थाने स्थितोपि विपरीतवेधात् वामवेधः शुभः॥ यथा सूर्यो द्वादशे नि षड्स्थे प्रा
कूसपदिशानिवर्जितेग्रहैः पंडुस्थानस्थिते विद्धः सन् शुभफल एवमुत्तरस्थानस्थितो यः काश्चिद्ग्रहः प्राक्पठित
स्थानास्थिते विद्धः विशेषः॥ इत्येवं सर्वत्र व्याख्येयं॥ अथ ये वामवेधस्त्युच्यते। कस्यप॥ अपि विद्धो ग्रहः किं
चिन्न ददाति शुभं फलं। वामवेधविधाने नत्वशुभोपि शुभप्रदः॥ द्विकोणे इति॥ सिते शुक्लपक्षे इंदुः चंद्रो द्वितीय
६९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नवपंचकेषु स्थितः शुभदः ॥ अत्रापि वशिष्ठमते चतुर्थस्थानस्थितैर्बुधवर्जितग्रहैर्यदि विद्धस्तदा शुभ इति ध्येयं ॥ नारदः
शुक्लपक्षे शुभश्चन्द्रो द्वितीयनवपंचमे ॥ रिपुमृत्युसुखस्थेष्वन विद्धो गगने च वैरिति ॥ अथ द्विविधवेधे मतद्वयमुपज्ञा
त्याह ॥ श्लो० ॥ स्वजन्मराशेरिह वेधमाहुरन्ये ग्रहाधिष्ठितराशितः सः ॥ हिमाद्रिविंध्यांतर एव वेधो न सर्वदेशेष्विति
काश्यपोक्तिः ॥ पा० टी० ॥ स्वजन्मेति ॥ इह द्विविधवेधविधौ अन्ये नारदादयः ॥ स्वजन्मराशेः सकाशाद्द्विविधवेधमा
हुः ॥ तथाचोक्तमत्रापि नारदेन जन्मत इत्युक्तौ ॥ अन्ये कश्यपादयः सः पुनर्द्विविधोपि वेधो ग्रहाधिष्ठितराशितः ॥
ग्रहो यस्मिन्राशौ तिष्ठति तत एव क्रमवेधो वामवेधश्च भवति ॥ यथा सूर्यो जन्मराशेः षष्ठे स्थितः शुभदः सूर्यः
स्वाक्रांतराशेः षष्ठस्थानस्थितैः शनिवर्जितग्रहैर्न विद्धः ॥ तथा सूर्यो द्वादशस्थानस्थितो नेष्टः ॥ सूर्यः स्वाक्रांत
राशेः षष्ठस्थानस्थितैः शनिवर्जितग्रहैर्विद्धस्तदा शुभफलद इत्यर्थः ॥ अथ द्विविधवेधस्यैव विषयकल्पनो
च्यते ॥ हिमाद्रीति ॥ हिमाचलविंध्याचलयोर्मध्यवर्तिन्यो वदेशे सर्ववेधो विज्ञेयः न सर्वदेशेष्विति ॥ कश्यपोक्तिः ॥ कश्यपवचने
यदाहसः ॥ सा तत्र्ये जन्मराशेः स्फुनिरिखिले यथावत्साववेला ॥ हिमाद्रिविंध्ययोर्मध्ये वेधं तं ग्रहाज्ज्याता ॥ अपरे तु सूर्यो दशसोय इति काय

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मु.टी.
७०

कोवेधोजन्मराशेरेवज्ञेयः। विपरीतवेधस्तुग्रहाधिष्ठितराशितएवेतिवदंति॥ गुरुः॥ जन्मजः क्रमवेधःस्याद्वामवेधोऽत्र 136
हारयादिति। इत्युक्तिरिमाद्विविधांतरविशेषमेवत्यन्यो। एतस्मान्नेऽष्टदमित्याह नारदः॥ अथसत्वाद्विविधंवेधंयोऽत्र
हन्तोवक्तुंवदेत्॥ सम्यग्वचनान्नाधीहास्येयातिजन्मेसदेति॥ ग्रहंगोचरदौष्ट्येपात्रादिनकार्यं॥ तत्रशांतिमाहनार
दः॥ ग्रहेषुविषमस्थेषुशांतिंयत्नात्समाचरेत्॥ सौम्यहितोमिष्टफलः क्रमदःपापवीक्षितः॥ निष्फलोनीचग्रहारवे
नशत्रुगणावलोकितः॥ नीचराशिगतःखेटःस्त्रस्थानानुगतोपिवा॥ शुभाशुभफलंनैवदद्याद्दृष्टोपिवेति।
एताहशास्यपेदुष्टत्वाभावादेवशांत्यभावइतिफलितोऽर्थः॥ अथगोचरस्थस्थानादूरुहणीयतत्तत्फलेग्रहणीयरा
हुगोचरफलं॥ ग्रहणस्याप्रतीकारेचदुष्टत्वग्रहणदर्शनविधिंचशार्दूलविक्रीडितेनाह॥ श्लो॰॥ जन्मर्क्षेनिध
नेग्रहेजनिभतोघातःक्षतिःश्रीःव्यथाचिंतासौख्यकलत्रदौस्थमृतयःसौमोननाशःसुखं। लाभोऽपायइतिक्रमात्तदशुभ
ध्वस्त्यैजपःस्वर्णगोदानंशांतिरथोग्रहंत्वशुभदंनोवीक्ष्यमाहुःपरे॥ जन्मेतियस्यजन्मनक्षत्रेग्रहेग्रहणेसतिनि
धनंमरणंस्यात्॥ वशिष्ठः॥ यस्यैवजन्मनक्षत्रेस्वर्भानुरूपवज्यते। राज्यभंगोसुहृन्नाशोमरणंवाजनिर्दिशेत्। राज्य
७०

स्यजन्मनक्षत्रे वा जाताः मिश्रे केन नक्षत्रे ॥ अथ राशिफलम् ॥ जनिमत इति । जन्मराशौ तु ग्रस्य ग्रहणे सति क्रमेण घातादिकं फ
लं भवति । यत्र जन्मराशौ ग्रहणे सति घातः शरीरपीडा ॥ द्वितीयराशौ द्रव्यनाशः ॥ तृतीयराशौ श्रीः । चतुर्थराशौ व्यथा
पंचमराशौ चिंता पुत्रादीनां । षष्ठराशौ सौख्यं सप्तमराशौ कलत्रदोषः कष्टं । अष्टमराशौ मृतिः नवमराशौ चिंता पु
त्रादीनां । दशमराशौ सुखं । एकादशराशौ लाभः । द्वादशराशौ अपायो नाशः । ग्रालम इति केचित् ॥ द्रव्याप्ति य
जन्मनक्षत्रे जन्मराशौ स्त्रीच चिंता क्रमात् सौख्यं तथा विद्यां जने चकुरूत व्याधिं मानहानिसिद्धिं लाभ मपाय मर्कशशि 137
नोः ग्रहणे समये ग्रह इति ॥ अथ शुभमस्य च वाग्ग्रहप्रतीकारमाह ॥ तत्र शुभमिति ॥ तस्य ग्रहणे शुभमस्य ध्वंसेन नाशय जन
पदस्वर्णगोदानैः ॥ जपो गायत्र्यादिमंत्राणां स्वर्णगोधेनुः भूमिर्वा उपलक्षणत्वादन्येषां रूप्यादीनां यथाशक्ति
दाने कार्यमिति शेषः ॥ तदोद्देश्या ग्रगुलकवज्रपविधिः स्वर्णादिदानेन भवेदित्युक्तेः ॥ दानं ज्योतिर्निबंधे ॥ सुवर्ण
निर्मितं नागं सतिलं ताम्रभाजनं ॥ सदक्षिणं च वस्त्रेणाच्छाद्य निवेदयेत् ॥ मंत्रश्च ॥ तमोमय महाभीम सोमसूर्य
विमर्दन ॥ हेमनागप्रदानेन मम शांतिप्रदो भव ॥ स्कंदे ॥ गोप्रदानं भूमिदानं च स्वर्णदानं विशेषतः ॥ ग्रहणे के
शनाशाय देवज्ञाय निवेदयेत् ॥ इति ॥ व्यासो नाम ॥ सर्वे गंगासमं तोयं सर्वे ब्रह्मसमा द्विजाः ॥ सर्वं भूमिसमं दा
नं ग्रहणे चंद्रसूर्ययोरिति ॥ अथ वंश ॥ ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ॥ मुच्यमाने भवेद्दानं मुक्ते स्नानं वि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मु.दी. धीयते॥ सूर्येंदुग्रहणे यावत्तावत्कुर्याज्जपादिकं। मितिशिवरहस्योक्तेस्तादिह्यादेवार्चनादिकार्यं॥ अथग्रस्तास्तविशेषे
७१ णग्रहणमरिष्टजनकमित्युक्तं॥ तद्दृष्टमृतादृष्टमपीतिसंशयेनिर्णयमाह॥ अथोऽस्तितुविशेषेपरेत्र्याचार्याः॥ अमु
मग्रहणंतुनोवीक्ष्येनदृष्टव्यमित्याह॥ उक्तं च॥ जन्मसप्ताष्टरिःफांकदशमस्थेनिशाकरे॥ दृष्टोरिष्टप्रदोराहुर्जे
महैनिधनेपिचेति॥ जन्मर्क्षे। जन्मनक्षत्रेनिधनेचधनराशिसप्तमोऽत्रपदद्वयमिति परमत्रावग्रहणदर्शनेचाशुभंविव
क्षितमिति॥ तेषामाशयः यतस्त्वशुभस्थानएवदृष्टोमेघव्याप्त्वेइतिपरेकांमतं॥ तत्सत्। अदृश्यरूपाःकालसमू
हेषोभगणाश्रिताः॥ शीघ्रमंदोच्चपातास्त्वाग्रहाणांगतिहेतवे। सूर्यसिद्धान्तपातानाममदृश्यत्वोक्तेः। अतःपाता
नामदृश्यत्वाद्राहोर्दर्शनमेवानुपपन्नं। नन्वग्रहणेचंद्रसूर्ययोःपादकोराहुरदृश्यतएव अतएवराहुग्रस्तेनिशा
करइत्यादिपुराणेकिरणोपीतिचेन्नभावेभाग्येमहीधरापाननुल्लेखकस्तमेपिवा॥ छायाशीकपातेग्रहणेक्रियमाणेऽपि
कोनकइत्यपक्रम्यच्छादकोभवेदित्यर्थः॥ इतिसूर्यसिद्धान्तेच्छाद्यच्छादकभावोभिहितःस एवपुराणविरो
धपरिहारायस्तुभास्करेणैवराहुःकुभामंडलगामित्यादिनोक्तः॥ वाराहेणापिनहिमन्त्रकालेसानिध्यमस्यतेनोपच
र्यतेराहुरित्युक्तः। तस्माद्दृष्टादृष्टयोर्भेदेनैवपरस्तोवातन्मतेदर्शनेचाशुभमेवविवक्षितं॥ एवंचराहोर्दर्शनमिति

138

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्पुरुषोनुपपत्तेः । तस्माद्दर्शनशब्देनोपरागो लक्ष्यते राहुदर्शने राहूपरागे तेन तस्मिन् राहुदर्शन इति । न च राहुहेतल्लक्षणयो
परागपरत्वमस्य दर्शनमिति पूर्वोपन्यासमिमन्तव्यदि हि दर्शनमिति वाच्यं लक्षणात्वयुक्ततया संभवे केनिविकल्पया । अस्त्वेतद्दर्शनं राहोस्तथा
वाच्यं तद्दर्शने ॥ प्रजापीडाविनिर्दिष्टपापव्याधिप्रकर्षितान्तस्करैरिति ॥ विष्णुधर्मोत्तरादिवाक्येषु च यदं तत्रासंनिधानाद्राहुशब्देनो
परागो लक्ष्यते ॥ इह च राहोः पातारत्वं ग्रहणातिरूपमर्थो तदसमर्थोत्वतो राहोर्दर्शनपातयोः ॥ समानार्थकतासीत्येवमि
द्धमिति प्रागुक्तानां स्ववचसां ग्रहणेऽस्नानादीनिबद्धत्वे तदसत् ॥ जन्मसमाहरिष्यंकेत्यादिना सामान्यतो निषिद्ध
स्याउदयास्तदर्शनस्यमध्ये तो ये नत्वादिस्मे नास्तेपातेकदाचन ॥ नोपरक्तेन कारिस्यनमध्ये नभसो गतमिति मनू
क्तोपरक्तदर्शनस्य पुनर्निषेधानुपपत्तेः । प्रागुक्तदिशा राहुदर्शनपदस्य राहूपरागलक्षकत्वेन तुल्यबलत्वाभावात् ॥ तस्मा
दुपरक्तयोः सूर्याचन्द्रमसोर्ययस्य कस्यापि दर्शनं निषेधसत्त्वाद्ग्रहणे चस्नानदानाद्युक्तेः स्नानदाने च ज्योतिशास्त्रैकदेशगाणि
तंगंधेभ्यो बुध्वा तस्मिन् काले च स्नानादिकं विधेयमिति सिद्धान्तः ॥ अत एव मेघाद्यावृते परागे स्नानादिकं विधेयमे
वराचोस्तथैवापरागे दिवा चंद्रोपरागे च स्नानादिकं तु वचनान्नभवति ॥ तदुक्तं निगमे ॥ सूर्येग्रहो यदा रात्रौ दिवा चंद्रो
ग्रहो यदि ॥ तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति ॥ नाहश्येग्रहणे दृष्टो दिदृक्षो नास्तीत्यपि सच्यति ॥ जाबा
लिवचनात्तु संक्रांतेः पुण्यकालस्तु षोडशो भयतः कलाः ॥ चंद्रसूर्योपरागे तु यावद्दर्शनगोचर इति ॥ ग्रस्तस्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

छ.दि.
७२

स्तमयपर्यंतं दर्शनगोचरत्वाभावकालः॥ पुण्यकालो भवतीति व्याख्यातं स्मृः॥ तदुक्तं विष्णुरूपनिबंधे॥ दिवा चेद्ग्रहे रात्रौ सूर्य 140

पर्वेंदुपुण्यदं। इंधिस्यंपुण्यवसेयं यावद्दर्शनगोचरइति॥ अन्येतु सूर्यस्यास्तोनेनरात्रिदिनेतद्दर्शनाभावः। अतएवताद्दुपरि

चास्थिते कुं दर्शनेस्नानमिति॥ वशिष्ठसिद्धांतदर्शनाभावेघाघावतेनावतेचोपयोगेनगृहीतानागतास्थितघटिकाः पु

ण्यकालइत्याहुः। यत्राकाशोभूम्याः स्मृतं स्नानमिवपुपतेसप्रदेशोभूतशाब्दवाच्य॥ अर्केंदूपल्लवहणे चेंद्रादि

ग्रहनक्षत्राणां॥ विद्युद्धर्मानंतं॥ अहोरात्रेनभोमध्ये वेदस्तूर्येग्रहोयदा॥ उक्तंदृष्टांतुमोक्षं स्नानाकत्वात्ततःपर

मिति॥ अस्तास्तेगृहः अस्ताचेवासमाने तु रवींदू प्राप्नुतो यदि॥ तयोः परेद्युरुदयेस्नात्वाभ्यवहरेन्नरः। इत्यनयोर्वाक्य

योर्दर्शनोदयशब्दौ मुक्तरूपोपरिस्थितत्वपरौ॥ अन्यथामेघावरणे नपरदिवसेपि दर्शनाभावेउपवासः

प्रसज्येत न च यत्र स्पर्शकाले ग्रहणे दृष्टास्नानेविहितेतत्रानंतरामेघावरणादुविचेद्दूपोर्दर्शनाभावो दिवसद्वयंत्र

यं वा स्यात्तत्रापुपवासप्रसंगः स्यान्न च शिष्टास्तथाचरेतितत्स्नादृष्टिदर्शनार्थ एव तस्मात्कालीयग्रहणदर्शने

ग्रहणस्नानेसतिमेघानावृतेपि ग्रहणे ग्रहणमदृष्टेव चंदुर्हमतास्व्येधेनगंतु मयाके नचरद्वादिनास्नानविधे

यत्रितिनात्पयोर्थः। अतएव भागवते कुरुक्षेत्रे स्नानार्थमिलितानां पांडवैर्यलोकानांध्वतराष्ट्रेपरिरंभणे

तइतिशिष्टाचारोप्येवमेवास्ति एवं चाशिरहजनकत्वाभावेपि ग्रहणदर्शनं निषेधः। किंपुनरिहजनकत्वेन

७२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्याज्जन्मऋक्षांके तिथय निर्मलत्वाद्भेदं किंचित्प्रत्यक्षोपलब्धवशीघ्रमस्तपुराणादिवाक्ये दर्शनयदाभावाद्ग्राह्यस्त
एव मूले परे इति वदंत्यमूलं ॥ शांतिस्तु दर्शनाभावे पि विधेयं ॥ यतो दिष्टयोर्मानां स्वरूपसत्तामेवारिष्टजनक
त्वात् ॥ अथ ग्रहणशांतिः ॥ येषां भास्करस्याभ्यमे राहु स्वेंदुमुपक्रमेत् ॥ कर्मक्षयपरिक्लेशान्प्राप्नुवंति च ते जनाः
पितृपक्षविनाशाय स्वर्यजमाने भवेद्ग्रहः ॥ होरायां नक्षत्रे यस्य नक्षत्रे वा निशाकरः ॥ प्राणसंदेहमाप्नोति स चामरण 141
मृच्छति ॥ यस्य त्रिजन्मनक्षत्रेषु ग्रस्येते शशिभास्करौ ॥ तज्जातानां भवेत्पीडा येन राः प्रोतिवर्जिताः ॥ सेकमदृ नस्य ये
षां जन्मानि त्रिनक्षेषु वा ग्रहणं वा कुरोगमृत्युजनने दानाद्वत्तयोजपाश्च कर्तव्याः ॥ तस्मात्तदानं च होमं च देवार्चे
नजपौ तथा ॥ उपरागाभिषेकं च्छांतिर्भविष्यति ॥ तत्र दानेयथारूपं विधायमृजगस्थत् ॥ कांचनेन तु पिठेन वा हि
मकरे दिवसाधिपे वा ग्रस्ते भिन्नादिवसे तमसा प्रदर्षाद्दिशाय वेदविदुबेष्ठपरीक्षिताय ॥ यस्य राशौ समासाद्य
वेद्ग्रहणसंभवः ॥ तत्र स्नानं प्रवक्ष्यामि मंत्रौषधिसमन्विता ॥ चंद्रोपरागं संप्राप्य कुर्याद्द्विजस्वाचने ॥ संपूज्य च तु
रो विप्रान् शुक्लमाल्यानुलेपनैः ॥ पूर्वमेवोपरागस्य समानीयौषधादिकं ॥ स्थापयेच्चतुरः कुंभान्व्रणान्सागरा
न्विति ॥ गजाश्वरथ्यावल्मीकसंगमात् ह्रदगोकुलात् ॥ राजद्वाराप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ पंचगव्यं च कुंभेषु
शुक्लान्यक्षतानि चारोचनां पद्मशंखौ च पंचरत्नसमन्वितं ॥ स्फटिकं चंदनं श्वेतं तीर्थवारि पवित्रका ॥ गजदंतं च कुं
कुमं सर्वौषधीरसगुग्गुलान् ॥ तत्सर्वं निक्षिपेत्कुंभे स्वाहा ... स्मुरान् ॥ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७३

ग्रावंतु मन्मथोत्थं हीं दुरितहृत्यकारका ॥ तिलहोमेध्याहृतिभिः सहस्रैर्वाष्टमेयुते ॥ एवं कृत्वा प्रयत्नेन स्नानकर्म स
माचरेत् ॥ आदित्यमनवतिर्मैत्रैः कुंभान्सकलसद्रवके ॥ योसौ वज्रधरो देवो आदित्यानां प्रभुर्मतः ॥ सहस्रनयनेः श
क्रो ग्रहपीडां व्यपोहतु ॥ योसौ निधिपतिर्देवः खड्गशूलगदाधरः ॥ चंद्रोपरागकालुष्यं धनदस्त्रं व्यपोहतु ॥ मुखं
यः सर्वदेवानां सप्तार्चिरमितद्युतिः ॥ चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु ॥ यः कर्मसाक्षी लोकानां धर्मो म
हिषवाहनः ॥ यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु ॥ निरृतिः कोणपो देवः प्रबलपानसेनिभः ॥ खड्गव्य
ग्रोति भीमश्च रक्षः पीडां व्यपोहतु ॥ प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः ॥ वायुश्चंद्रोपरागोत्थां ग्रह
पीडां व्यपोहतु ॥ योसौ विडपतिर्देवो भवानीपतिरीश्वरः ॥ चंद्रोपरागजां पीडां स नाशयतु शंकरः ॥ त्रैलोक्ये यानि
भूतानि स्थावराणि चराणि च ॥ ब्रह्मविष्ण्वर्कयुक्तानि तानि पापं हरंतु वै ॥ एवमामंत्रितैः कुंभैरभिषिक्तो गुणा
न्वितः ॥ एतानि च ततो मंत्रान्विलिख्य कनकान्वितान् ॥ वस्त्रे पट्टे पवा भूर्जे पंचरत्नसमन्वितान् ॥ यजमा
नस्य शिरसि निदध्युस्ते द्विजोत्तमाः ॥ ततो तिचाहयेद्दूलाभुपरागानुगामिनो ॥ प्राङ्मुखः पूजयित्वा तेन त्वा
चाभीष्टदेवताः ॥ चंद्रग्रहे विनिवृत्ते कृतशौचमंगलः ॥ कृतस्नानेर्नमंत्र तत्सर्वं ब्राह्मणाय निवेदयेत् ॥ अ
नेन विधिना यस्तु ग्रहस्नानं समाचरेत् ॥ न तस्य ग्रहपीडा स्यान्न च बंधुधनक्षयः ॥ सूर्यग्रहे स पंचामस

142

७३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

143

सदा मंत्रेण कीर्त्तयेत् ॥ य इदं शृणुयान्नित्यं श्रावयेद्वापि मानवः ॥ सर्वपापविनिर्मुक्तः सर्वत्र सुखवान् भवेत् ॥ इति
मत्स्यपुराणे कायस्थ ग्रहशांतिः ॥ अथ चौधरी मिश्र ग्रहशांतिः ॥ रोचनं पद्मकं शंखं कुंकुमं रक्तचंदनं ॥ स्फटिकं स्फटिकं तीर्थ
कुसितपद्मपगुग्गुलम् ॥ मधुकं देवदारुं च बिल्वक्रांता मालती वरी ॥ वेलां च सहदेवीं च निशा हिमपमे वच ॥ दूर्वा कुशे शमी
रशमी मिलाजिनं सर्वौषधे सर्वौषधिं च समाहिः ॥ स्नाने विदध्याद्ग्रहगोरवीरोः पीडाकरे शांतिकरं च यत्स्या ॥ अथ
(चौधरी मिश्र ग्रहशांतिः) अथ चंद्रबले विशेषमनुष्ठमाह ॥ श्लो ॥ कृष्णपक्षे तु पापयुक्तविंदधो घने पापसंज्ञः शुभोप्यस
न् ॥ शुभाः प्रोक्ता बिमिश्रो योगुरुः शोऽशुभेऽपि सन् ॥ टीका ॥ कापोतः पापहृष्मध्य वर्नी पापग्रहयुक्तपापो घने स तमे
वर्तमानस्तदा शुभोप्यसन् ॥ अथ शुभग्रह ॥ यदा स शुभोपि चेद्गुः शुभोप्यो शुभग्रहलवीक्षेन या गुरुणा दृष्टः सन् शुभ
फलदाता भवेत् ॥ अन्यदप्यनुष्ठमाह श्लो ॥ सितासितादौ सद्दृष्टे चेद्दृष्टलौ शुभावुभौ ॥ व्यत्यासो वा शुभौ प्रोक्तौ
संकटे चंद्रबले त्विंदौ ॥ टी ॥ शुक्लपक्षादौ प्रतिपदि समीचीनश्चेत्सति संपूर्णपक्षः शुभः ॥ असितादौ कृष्णपक्षप्रतिप
दि दुष्टेचेद्दृष्टसति संपूर्णः कृष्णः शुभः ॥ व्यत्यासे च पूर्वोक्ता द्विपरीतो वा बिपक्षावलिशो ॥ यदा शुक्लप्रतिपदि चेद्दो
दुष्टश्चेत्तदा सकलः पक्षो निष्टः कृष्णपक्षप्रतिपद्द्यपद्दिचे द्रोदुष्टश्चेत्तदा सकलः पक्षो निष्टः कृष्णपक्षप्रतिपदि
चेच्छुभश्चेत्तदा संपूर्णः कृष्णपक्षो निष्टः इदमेतावद्गुरुबले चंद्रबले संकटे विवाह यात्रा या वस्यकर्तव्येत ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्कालिकचेद्बलाभावे चग्राह्यं नान्यथेत्यर्थः ॥८॥ अथ ग्रहदोषपरिहारपूर्वकं तुष्टिसंपादनार्थं नवरत्नसमुदायधार
णं शास्त्रान्तरेणाह ॥ श्लो० ॥ वज्रं शुक्रेब्जे सुमुक्ता प्रवालं भौमे स्तौ गोमेदमार्कौ सुनीलं ॥ केतौ वैदूर्यं गुरौ पुष्पकं ज्ञे पाचिः प्रा
- ङ्माणिक्यमर्के तु मध्ये ॥१॥ टी० ॥ अत्र सुवर्णमुद्रिकायां नवधा मत्कार्यां क्रमादिप्राग्याक्रमेण नवरत्नानि नि
धेयानि । तत्र प्राग्भित्तिपंचप्यां तन्मध्ये पंचमीच पंक्तिः प्रलोपेन तत्प्रागादि दिक्षु इत्यर्थो जातः ॥ तत्र शुक्रप्री
तये पूर्वस्यां दिशि वज्रं प्रेत्नहीरकं निधेयं ॥ एवं चंद्रप्रीतये सुमुक्ता शोभनमुक्ताफलमाग्नेय्यां भौमप्रीत्यर्थं द
क्षिणस्यां प्रवालं ॥ स्वर्भानोः राहोर्नैर्ऋत्यां गोमेदमार्कौ शनैश्चरप्रीतये पश्चिमायां शोभनं नीलं केतोर्वायव्यां वैदूर्यं गुरोरुत्त
रस्यां पुष्पकं पुष्परागं ॥ बुधेऐशान्यां पाचिर्मरकतं ॥२॥ अथ सतिसामर्थ्ये नवरत्नधारणमशक्तस्य विदनी
मसतिसामर्थ्ये एकैकरत्नधारणमिष्टग्रहाह ॥ श्लो० ॥ माणिक्यमुक्ताफलविद्रुमाणि मारक
तं पुष्पकवज्रनीलं ॥ गोमेदवैदूर्यकमर्कतः स्युः रत्नान्यथो ज्ञस्य मुदे सुवर्णं ॥१॥ माणिक्यमिति । टी० ॥ सूर्यप्र
ीतये माणिक्यं धार्यं एवं चंद्रस्य मुक्ताफलं ॥ भौमस्य विद्रुमं प्रवालं बुधस्य मारकतं गरुडपाचि ॥ गुरोः पुष्प
कं पुष्पराजं ॥ शुक्रस्य वज्रं हीरकं ॥ शनेर्नीलं लसुणया ॥ राहोर्गोमेदं । केतोर्वैदूर्यमेवमर्कतः क्रमेण नो
ग्रहाणां रत्नानि धार्याणि स्युः ॥ तत्र यद्ग्रहदोषस्तस्य ग्रहस्यैकस्यैव तद्रत्नमेव धार्यमित्यर्थः ॥ अथ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्मन्मुदेसुवर्णं मित्याग्निमच्छेकेमसंर्वेघः ॥१०॥ अथमकामूल्यरत्नधारणस्यासामर्थ्येऽल्पमूल्यानिरत्नानिता 145
रावलेषाल्पिन्याह ॥ श्लो० ॥ धार्यंलाजावर्तकंराहुकेत्वोरूप्यंशुक्रेबोधमुक्ताशशिरोस्तुमुक्ताहेमंदस्वारभान्वोःप्रवा
लेतारा जन्माहोविरावलितःस्यात् ॥११॥ टी० ॥ धार्यंति ॥ राहुकेत्वोरूशोलाजावर्तकंमणिविशेषोधार्यःशुक्रे
बोरूरूप्यं ॥ शशिनस्तुशैवंमुक्ताफलं ॥ मंदस्यलोहं ॥ आरभान्वोस्तुमौप्रवालंधार्यं ॥ तारेति ॥ यदिनेतारावलेचि
क्षिते ॥ तद्दिनेयातारा जन्मनक्षत्रात्रावलितः ॥ पुनःपुनरावलितत्रयेणगणनीयास्यात् ॥ त्रिरिति ॥ स्तु
त्मक्षयेजन्मनक्षत्रात्दिननक्षत्रेगणितेननवमिर्भक्तेनिःस्वशेषाःतत्रयामवंति ॥ वशिष्ठतारायाःशुभमस्य
शुभंचवाच्यतिफलितोर्थः ॥१२॥ अथशोभनमेगस्तुकलाप्राग्वासेत्रानुष्टुभाह ॥ श्लो० ॥ जन्मारख्यसंपत्वि
पत्क्षेमप्रत्यरिसाधकाः ॥ वधमैत्रातिमैत्राःस्युस्तारानामसदृशफलाः ॥१३॥ स्पष्टार्थः ॥१३॥ (अथशोभनमेत्य)
(कलास्कारा) अथवयकत्वेउतारागणप्रकारह्येवपरिहारंशार्दूलविक्रीडतेनाह ॥ श्लो० ॥ नामस्योत्वर्ण
तिलान्नविपद्यपिण्डंशाकंत्रिजन्मर्क्षयो ॥ दघान्प्रत्यरितारकामूलवर्णंसर्वोविपत्प्रत्यरि ॥ मंत्वृष्माद्दिम
पर्ययेपेनक्षमदोयेषांद्वितीयेशाकानादिर्ग्रात्यतृतीयकाः अथपर्ष्ठभाः सर्वेतृतीयेस्मताः ॥१४॥ टी० ॥ मत्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७५ विति॥ मत्योचततारायां स्वर्णतिलान्यथाशक्त्या ब्राह्मणाय दद्यात्॥ विपद्विपत्तारायां गुडं दद्यात्॥ त्रिजन्मसुतिसप्
तांशुशाकं च लाकादिकान् दद्यात्॥ अथो प्रत्यरितारिकासु पंचमतारायां लवणं दद्यात्॥ नारदः॥ जन्मत्रिपंचस
प्ताख्यानातारासु विघ्नफलाः स्मृताः॥ शाकं गुडं च लवणं सतिलं कांचनं क्रमात्॥ अनिष्टपरिहाराय दद्यादेत
द्विजातये॥ इति॥ अथ द्वितीयपरिहारः॥ तत्रादिमपर्याये प्रथमावर्तो विपत्॥ प्रत्यरिमृत्युस्ततो पापंच
मीसप्तमस्तारा॥ सर्वो अपि मासान्यतः षष्टिघटिकात्मिका नशुभदाः स्युः॥ अथ द्वितीयपर्याये द्वितीया
वर्तो विपत्॥ प्रत्यरिमृत्युनी आदिमा तृतीयका अंशा न शुभदाः॥ विपत्तारायामाद्यपादप्रथमचरणो
निषिद्धः॥ प्रत्यरितारायां प्रांत्यां शाध्यन्तूर्ध्वचरणस्त्याज्यः॥ मृत्युतारायां तृतीयांशात् तृतीयचरणस्त्याज्य इ
ति॥ अथ तृतीयावर्ते विपत्प्रत्यरिमृत्युश्चैते सर्वे षष्टिघटिकात्मिकाः॥ २३॥ उक्तं च दीपिकायां॥ पर्या
ये प्रथमे वर्ज्या विपत्प्रत्यरिनैधनाः॥ अथ चंद्रावस्थागणनोपायमाह॥ श्लो॥ षष्ट्विघ्नं गतिभं भुक्तघटीयु
क्तं पुनाहतं॥ शराब्धिहृच्छायतोर्कं शेषे चंद्रस्य क्रमाद्विदे॥ २४॥ षष्टिघ्नमिति॥ अश्विन्यादारभ्य गतमानि षष्ट्या
गुणानि वर्तमाननक्षत्रस्य भुक्तघटिकायुक्तानि तानि पुनर्द्विगोऽष्टनुर्भिराहत्य निशराब्धि ४५। हत्वे चचत्वा ७५

146

रिं शतताभास्यानि। यच्चैव मागतं गतावस्था सा शेषं वर्तमानावस्था या। तत्र लब्धांकस्था पिंडादेष्याभिक्षेत्सदस्त्रभागो।
शेषे प्रवासाय वस्थाचेद्भुक्तगताः स्युः। ताश्च वस्थामेव मशेषे वेसः प्रवासादिसंज्ञाता। व मनशेषेन्वादिसंज्ञाः एवमिष्
कादिदशाराशिषु स्वादितो द्वादशावस्थाक्रमेण भवंतीत्यर्थः २४। अथ द्वादशावस्थानामानि क्रमान्नामसदृशं फलास्युः 147
२५। स्पष्टार्थः॥ अथ ग्रहाणां वैकृतपरिहारार्थं औषधं स्नानं दक्षिणाश्च श्लोकचतुष्टयेनाह॥ श्लो॥ लाजाकुष्ठवलाप्र
यंगुघनसिद्धार्थैर्निशादारुफणिःपुंखालोध्रयुतैर्जलैर्निगदितं स्नानं ग्रहोत्थापहं॥ धेनुः कंबुररुणो वृषभस्कन
कंपीतांबरं घोटकः। श्वेतागौरसिता महासिरजइत्येतावद्वेदक्षिणाः २६। लाजेति। लाजा भ्रष्टशालयः॥ इति केचित्॥
यस्तुतत्सप्तश्रीवचोसाहच्चर्यात्॥ लाजाशब्देन लाजाशब्देन लज्जावती गृह्यते॥ कुष्ठं प्रसिद्धं। वला वरियारा प्रि
यंगुः फलिनी घनो मुस्ता सिद्धार्थो सर्षपाः निशा हरिद्रा दारुहरिद्रा देवदारुर्वा पुंखा शरपुंखा लोध्रः प्रसिद्धः। ए
तैरौषधैर्युतैर्जलैः कृतं स्नानं। ग्रहोत्थापहं तु दुष्टग्रहस्य चिंता विघ्नाघ्राकं स्यात्। सप्रियंगुरजनीद्वयमोसीकुष्ठ
लाजसितसर्षपखंडेवारिभिः सरुवचैः सहलोधैः स्नानमतिनिविलग्रहपीडालुकं॥ अथ रवेः रवि मारभ्यदक्षि
णा उच्यते। सूर्याय धेनुः। चंद्राय कंबुः शंखः। भौमाय अरुणो वृषः। बुधाय स्वर्णं गुरवे पीतवस्त्रं यथाविभवं काप्यो
सं कोशाजेवा॥ शुक्राय श्वेतो घोटकः। शनये श्यामवर्णा गौः। राहवे महासिर्मेखलायुक्तः खड्गः। केतवे छागो मे
षः। एता दक्षिणाः २६॥ गतब्धराशेः कियद्दिनैः फलं दद्युरित्येतद्धपमानाद्याह॥ श्लो॥ सूर्यारसौम्यास्फुजितो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७६ लनागमसमाद्विघस्त्वात् विधुरानिनाडी॥ तमोपमेज्याख्विरसाब्धिमासात् गतेत्यव राशेः फलदाः पुरस्तात्॥ १०॥ सूर्येति। अ 148
र्किगव्हिवक्तराशेः पुरस्तात्। पूर्वमेवतत्तत्संख्यघटीदिवसमासान् शुभाशुभप्रदाः स्युः॥ यथा सूर्यो गंगा तद्राशेः पुरस्तात् पं
चदिनानि फलदः। भौमेषट्दिवसान् बुधः सप्तदिवसान्। शुक्रोविंशतिदिवसान्। चंद्रोग्निनाडीत्रयं राहुर्गतवरराशेः
पूर्वं त्रिमासान्। शनिं षण्मासान् गुरुर्मासद्वयं पूर्वं फलदः स्यादिति॥ १०॥ अथात्ववक्ष्यकत्वेतिष्यादौ प्राप्तलिन्यारानमाह
श्लोकः॥ दुष्टयोगे हेमचंद्रे च दानं स्वधान्ये तिथ्यर्धे तिथौ तंदुलाज्यं॥ वारे रत्नं भे च गां हेमनाड्यां दद्यात्तिंध्रसंचतारासु रा
जा॥ १०॥ दुष्टेति॥ राजा दुष्टव्यतीपातादियोगे तथा नाड्यां घटिकायां दुर्मुहूर्ते दिदुष्टवासु वर्णं यथाप्राप्ति दद्यात्
एवं सर्वत्र योज्यम्। अथ वसंततिलकयान्यदाह श्लोकः॥ रात्र्याद्विगो वविकुजौ फलदौ हि तेज्यौ मध्ये सदा शशि
सुतः प्रहरमेव मंदो अध्वास्त्रवह्निभमरुत्सममतिष्ठ वसुस्त्रपसो मयद्कुरवाद्रि मासिजननि मेर विवासरादौ॥ १२॥
अध्वाद्येति। पूर्वार्धं स्पष्टं। यस्मिन्मासे जन्मनक्षत्रं भवेद्यो सूर्यो दिवा रात्रौ स्युः तस्मिन्मासे अध्वाद्येति पला
निकानि। यत्र मासि रविवासरे जन्मनक्षत्रे सति अध्वाभोगो भवति। एवं चंद्रवारे अस्त्रे भद्रस्य प्राप्तिरित्यादि॥
इति श्रीदैवज्ञरामविरचितायां चिंतामणिटीकायां गोचरप्रकरणं॥ अथ संस्कारप्रकरणं व्याख्यायते॥ तत्र
संस्क्रियते नेन आत्मा तेनस्यात् तेन वा कर्मणा पुरुष इति संस्कारः॥ स्त्रीपुंसयोः प्रजातौ सामान्यविशेषज विहिते ७६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिकस्मार्तकर्मानुष्ठानद्वाराहविशेषाधायकइतियावत्॥ लक्षणयातदर्थोक्तदिनप्रत्यादिकंसंस्कारशब्देनोच्यते॥तस्यप्रकर
णमुपक्रमः। तेचसंस्कारागर्भाधानादयोषोडशचत्वारिंशत्॥ तत्रगर्भाधानेप्रथमंसंस्कारः।सचरजस्वलास्त्रीधानग्रहीतोरजोदर्श
नाच्छुभाशुभमुक्तंवशिष्ठेनप्रथमरजोदर्शनतः शुभाशुभंभवतिसर्वलोकानामिति। तत्रशुभसूचकाशुभोदर्शनमनुष्टुभा
ह॥ श्लो०॥ आद्यर्तौरजः शुभमासमार्गराधशुक्लफाल्गुने॥ मेषवृषाववत्यैन्द्रमूलेषुसनारेसत्ननोदिवा॥१॥ राधोवैशाखः। इषआश्विनः।९
शुमासेषुआद्यर्तुप्रथमोमवेरजोदर्शनेस्त्रीधर्मः शुभंभविष्यकृष्णमसच्चकेतथाम्हृक्षपते। कृष्णपक्षेतुदशमीपर्यंतमध्यमंतेप
तुस्वपलमदशमीसमीपकृत्स्नमादिशेदितियावदितिप्रिशोक्तः।समहारेशुभवारे। समस्तंवार्तंतवेसंपूर्णलेषुस्त्रगुरुसितबुधको
बीस्यतेवापवलग्ने। तिमिरमिवकठोरवर्योतिस्यतिकालेदृष्टेप्राप्येसमैयेतिमातुपाक्षीपितानिकठोरयोतितिः सूर्यः
॥१०॥ अथाधमध्यमासाशुभकंलाहएषनुष्टुभाह॥ श्लो०॥ स्मृतित्रयमदुदितिप्रभ्रवस्वातीसिताविवरे। मध्यमेचमूलादि
तिभपितरिस्त्रेवरेष्वसत्॥२॥ रक्षतीति। एतेषुसितोचेरोक्तंतवश्लो आद्यर्तुरजः शुभमिति पूर्वंसंबंधः। मूलादिषुमिश्रे
कृत्तिकाविशाखेमध्यमे। परेषुभरणीभेषादाश्लेषापूर्वोत्रयेष्वसत्॥ अनिष्टा...त्रविशाखामूलयोर्मध्यमत्वाभि
धानेवशिष्ठकाकेऽ...फलश्रवणात्॥ हिदेवतेपुष्यवतोप्रमतामूलेप्रकाशमाधिकहानसत्वेति।।२॥ अथपातिघरजोद
र्शनेपालिन्याह॥ श्लो०॥ भद्रानिद्रासंक्रमेदर्शरिक्तासंध्याषष्ठीद्वादशीवैधृतेषुरोगेग्रहेमांचंद्रसूर्योपरागेपातेचाघे

१५७

मु.टी.
११

नोरजोदर्शनेसत् ॥ अतिदुष्फलमित्यर्थः ॥३॥ अथरजस्वलास्नानमुहूर्तंवसंततिलकेनाह ॥ श्लो० ॥ हस्तानिलाश्विमृगमैत्रवसुध्रु
वाख्यैः शाक्रान्वितैःशुभतिथौशुभवासरेच ॥ स्नायादृतौयुवतीमृगपौष्णवायुहस्ताश्विधातृभिरलंलभतेनगर्भं ॥४॥ टी०॥
एषुभेषुतिथौरिक्तामारहितेशुभवारे आर्तववतीसत्स्त्रीस्नायात् ॥ अत्रविशेषमाह ॥ मृगेतिमृगरेवतीस्वातीहस्ता
श्विनीरोहणीनक्षत्रैःस्नातासत्युवतीअरंशीघ्रंगर्भंलभते । लघुक्षिप्रमरंद्रुतमित्यमरः ॥ दाक्षिणात्यास्तुचतुर्थेदिनएव
स्नानंकिंकुर्वंति अन्येविहितदिनेकुर्वंति । नक्षेदृशाचारंलोकव्यवस्थेति ॥४॥ अथगर्भाधानंशार्दूलविक्रीडितवृत्तेनाह
ह ॥ श्लो० ॥ गंडांतंत्रिविधंत्यजेन्निधनजन्मर्क्षेचमूलांतकौ । दास्त्रंपौष्णमथोपरागदिवसंपातंतथावैधृतिं ॥ पित्रोःश्राद्ध
दिनंदिवाचपरिघाद्यर्धंस्वपत्नीगमेभान्युत्पातहतानिमृत्युभवनंजन्मर्क्षतःपापभं ॥५॥ भद्राषष्ठीपर्वरिक्ताश्च वे
संध्याभौमार्ककौनाद्यरात्रीश्चतस्रः । गर्भाधानंत्र्युत्तरेंदुर्कमैत्रब्राह्मस्वातीविष्णुवस्वंबुपेसत् ॥६॥ टी० ॥ त्रिविधं
तिथिनक्षत्रलग्नानांगंडांतं । श्रीपतिः ॥ नक्षत्रतिथिलग्नानांगंडांतंत्रिविधंस्मृतं । नवपंचचतुर्थानांदेकार्धघटिका
मिति । निधनजन्मर्क्षेनिधनतारांचमूलं ॥ अंतकंभरणींदास्त्रमश्विनींरेवतींमघां । पातंव्यतीपातंमहापातंच
पित्रोःमातापित्रोःश्राद्धदिनंदिवाउत्पातहतानिदिव्यभौमांतरिक्षैस्त्रिविधोत्पातैर्हतानिदूषितानि । जन्मर्क्षतः
जन्मराशेर्जन्मलग्नाद्वाष्टमभवनमष्टमलग्नंपापयुतंभवतिपर्वाणि । चतुर्दश्यष्टमीकृष्णामावास्यापौर्णिमा

११

150

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव चेति॥ संध्यं हूयं॥ सौमस्यूयेशानि वारान्॥ अथ धरात्री: रजोदर्शनदिनमारभ्यादिनचतु ।5।
ष्टयं त्यजेत्॥ ५॥ कालविधाने षष्ठ्यष्टमीपंचदशीचतुर्थीचतुर्दशीमष्टमपात्राहिताः॥ ६ शेषाः शुभास्यु॥ तिथयो निषेकोत्का
वाताः शुभा नो गर्भाधानमिति॥ उत्तराः इंदुमृगोर्कोर्हस्तः॥ मैत्रमनुराधा रोहिणी स्वाती श्रवणधनिष्ठा शततारका सुगर्भा
धाने सत् शुभे॥ गुरुः॥ हविहस्तानुराधाश्वस्वातीवारुण्यकासवं॥ उत्तरात्रितयं सौम्यं रोहिण्यश्व शुभाः स्मृताः॥ अथाधाने
मूलसार्पांत्यमपशुभं सममन्यमिति॥ ८॥ अथ गर्भाधाने लग्नमिंदुवज्रपाह॥ श्लो०॥ केंद्रत्रिकोणेषु शुभैश्च पापैस्त्र्याया
रिगैः॥ पुंग्रहदृष्टलग्ने॥ ओजांशगेप्यपिचयुग्मराशौ चित्रादितीज्याश्विशुभं च स्यात्॥ २री॥ शुभैः केंद्रत्रिकोणेषु सत्त्रिः
पापग्रहैस्त्र्यायारिगैः सद्भिः पुंग्रहैः॥ रविभौमगुरुभिर्दृष्टलग्ने सति॥ तथोजांशके चंद्रे ओजांशगे विषमविषमराशीनानवां
शगे सति॥ अपिशब्दात्वनेपि विविषमांशगे युग्मराशौ गर्भाधाने कार्यं मध्यममान्याह॥ चित्रादितीज्याश्विपुनर्मे धाने म
ध्यमे स्यात्॥ गुरोः॥ चित्रादित्येतथातिष्यतुरगोचेति मध्यमाः॥ शेषमण्युत्ताकिंदुष्टानि सुनिषेककारव्यकर्मणीति एवं ग
र्भाधाने विधाय पुंसोर्किं कार्यमित्याह॥ विसः॥ निशासमयमासाय साधनौ तूलचेदने त्यजेत्॥ पर्वकालमसेवनाया
लंद्रूपुत्रणामिमत्सकात्॥ इति गर्भाधाने॥ अथ सीमंतोन्नयनं शार्दूलविक्रीडितेनाह॥ श्लो०॥ जीवार्कारदिने मृगोज्य
निरतिष्येआदितिहस्तभैः॥ रिक्तामार्करसाष्टवर्ज्येतिथि सिर्गो साधिपे पीवरे॥ सीमंतोष्टमषष्ठमास्मि शुभदैः केंद्रे (

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मु.दी.
७८

त्रिकोणेषु बले तो भारि त्रिषु चाप्यंत्यषड्हे लग्ने च पुंनांशके॥ ८॥ गुरु दिने रविभौमवारे तिष्यतिमूलार्द्रा श्रवणहस्ताः एतैर्नक्ष
त्रैः॥ तिथि ४।१२।१४। अमा ३० अर्क १२ रसा षष्ठी ६ अष्टमी अष्टमी ८ अमा रिक्ता वर्जित तिथि मिश्रित पक्षे अन्यार्हिते दिने मासाधिपे पीवरे। पु
षे सतीत्यर्थः। एतादृशे समये अष्टम षष्ठ मासि। अष्टम मासे षष्ठ मासे वा सीमंतः सीमंतकाख्यो गर्भसंस्कारः कार्यः॥ त
त्र शुभग्रहैः केंद्र त्रिकोणे संस्थितैः बलैः पापैर्लाभारि त्रिषु संस्थितैः पुंनवांशके लग्ने पुरुषराशौ विषमराशौ लग्ने नवांशे
च विषमराशौ सति तदा सीमंतः शुभः॥ अथ विशेषमाह कश्यपः॥ चंद्रेऽपि शुभदो से पक्षस्य त्वाच्च मासमध्यपात्॥ सी
मंत लग्नादेकोपि क्रूरः पंचाष्टरिष्फगः। हंति सीमंतिनीं सोपि तद्गर्भं वा न संशयः॥ नैधने तपो लग्नेशुद्धि संयुते॥
तयोः स्त्रीपुंसयोः॥ अस्यापवादः॥ लग्नादष्टमराशीशः केंद्रगः शुभवीक्षितः॥ षष्ठाष्टमस्थो ... दोषमाशु व्यपो
हति॥ गर्गः॥ सीमंतोन्नयनं कार्यं शुभांशे शुभलग्ने कुलीरयुग्मकन्याख्ये वर्जो षोषा व शोभना इति॥ अत्र यद्यपि बलेस
ति कुलीरमिथुनं कंन्या अपि ग्राह्या इति ज्ञेयं॥ अत एव मूलं लग्ने विचारो न कृतः। कारिकायां॥ पुन्नक्षत्राणि चैतानि
तिष्योहस्तः पुनर्वसुः। अभिजिन्मोक्षपाशेव श्रवणानुराधाश्विपुष्यकपाः॥ सहस्यस ... पादद्वये सीमंतः ... तृतीयके। अथ
मतांतरे गुरुः॥ रोहिण्यादित्य पुष्याहस्तोत्तरात्रयं ... वैष्णवं ... सीमंतादिषु सम्मताः॥ सोम्यानां वार व
र्गाः स्युः सीमंतादिषु शोभनाः॥ इति जन्मसंस्कारे सीमंते निषिद्धमाह॥ वशिष्ठः॥ मातान्नप्राशनं कौतुकं तद्व्रते धने च राजाभिषेके व

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७९ लग्नजन्मपि हस्तं ॥ शुभेऽस्त नि हंस्ततं ते विवाहसीमंतयात्रादिषु मंगलेषु ॥ गुरुः ॥ मासप्रयुक्त कार्येषु मृति ते गुरुशुक्रयोः ॥ न 153
दोषकन्मलमासो गुर्वादित्यादिके न च ॥ यद्यपि पुंसवनस्य प्रथमे कर्तव्यत्वात् वैनिरूपणमावश्यकं तथापि कश्चि
त्संबंधेन सह वविधानात् कुतथैवाचारदर्शनात्सीमंतप्रथमकृत्ये एव उक्तः ॥ नृसिंहः ॥ सीमंतोन्नयने सोक्तिथिवारभिरा शिषु
पुंसवकारये द्विद्वान् सहवै कदिने यथा कृति ॥ अथ मासेश्वरान्स्त्रीणां चंद्रवलं च वसंततिलके नाह ॥ श्लोः ॥ मासेश्वराः सि
तकुजेज्यरवींदुसौरचंद्रात्मजात्मनुपचंद्रदिवाकराख्याः ॥ स्त्रीणां विधौ बलमुशंति विवाहगर्भसंस्कारयोरितरकर्मसुभ
र्तुरेव ॥ ८ ॥ मासस्थिति ॥ अष्टम मासे गर्भाधानलग्नाधिपः स्त्रीणामिति विवाहे गर्भसंस्कारे गर्भाधानपुंसवनसीमंतादिरूपे
स्त्रीणामपि चंद्रवलं ग्राह्यं ॥ इतरकर्म सुवस्त्रालंकाराद्धिधारणादिषु भर्तुरेव चंद्रवलं ग्राह्यं ॥ यदा भर्ता मृतस्तदा पुन
स्त्रीणामेव ॥ राजमार्तंडः ॥ विवाहकार्ये कुसुमप्रतिष्ठा वनिताविशुद्धौ अन्यानि कार्याणि धनस्य शुद्धौ ॥ पत्नी विहीने प्र
मदा ल्यशुद्धा ॥ ९ ॥ अथ येषांप्रथमे गर्भे पुंसवनमुहूर्ते चंद्रवलं यथाह ॥ श्लोः ॥ पूर्वोदितैः पुंसवनं विधेयं मासे तृतीये त्वथवा वि
लग्नजा ॥ मासे ष्टमे विष्णुविधातृजीवैर्लग्ने शुभे मृत्युगृहे च शुद्धे ॥ टीका ॥ पूर्वोदितैः सीमंतकर्मण्युदितैस्तिथ्यादिभिः रूप
लक्षितेन तृतीये मासि पुंसवनाख्यं कर्म विधेयं ॥ पुमान् सूयते नेन इति पुंसकर्म ण पुत्वहेतुता ॥ प्रथेति सीमंतानंतरम ष्ट
मे मासि विष्णुविधातृजीवैः श्रवणरोहिणीपुष्यैरुपलक्षिते दिवसे तथा लग्ने शुभे शुभस्वामिके ष्टमं पुनः गृहे वा मत्युगृहे
७९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽष्टमस्थाने गुरौ सर्वग्रहाद्यहितो विष्णुपूजा कार्या ॥११॥ अथ जातकर्म नामकर्मणोर्मुहूर्त्तमप्याह ॥ ज्यो० ॥ तज्जातकर्मादि शिशो
र्विधेयं पर्वाख्यरिक्तोनतिथौ शुभान्हि ॥ एकादशे द्वादशके पि घस्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात् ॥१२॥ टी० ॥ जातकर्म यद्यपि जन्मा
नंतरमेव विहितं तथापि कौं नष्यगीपानादि दुष्टदिवसतयापि आद्य सन्निधाने च नक्षत्रं कृते तदा मुहूर्ते विचारेण कार्यं ॥ गर्गः
व्यतिपाते च संक्रांतौ ग्रहणे वैधृतावपि । आशौचविनाशुभे कर्म प्राप्ते काले विनाचरेदिति ॥ अत एव काले विकल्पोक्तानार
देनान्तस्मिन्नु जन्ममुहूर्ते तु सूतकांते सदा शिशोः ॥ जातकर्म च कर्तव्यं पितृपूजनपूर्वकमिति ॥ तज्जातकर्मादीति ॥
तस्य जातस्य शिशोर्जातकर्म आदिशब्दान्नामकर्माप्युच्यते ॥ पर्वाणि चतुर्दश्यष्टमीकर्षमायादि पूर्वोक्तानि रिक्ताभि
स्ताऊनतिथौ शुभेन्हि शुभवारे तथा एकादशे वा घस्रे दिने तथा मृदुध्रुवक्षिप्रचलनक्षत्रेषु शिशोः स्यात् इति कोते जातकर्मा
दि विधेयं ॥ तत्र श्रवणानंतरं सचैलस्नानं कृत्वा कार्यं ॥ वसिष्ठः ॥ श्रुत्वा जाते पिता पुत्रं सचैलं स्नानमाचरेत् ॥ उत्त
राभिमुखो भूत्वा नद्यां वा देवखातके ॥ तत्र शीतोदकेन कुर्यात् भिन्नक स्नाने शीतादिभिः काम्यमेव चेति रात्रावपि
कार्यं ॥ वसिष्ठः ॥ पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः ॥ राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि ॥ सूतके तु समु
त्पन्ने पुत्रजन्म यदा भवेत् ॥ कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति ॥ यत्र जलाशयगमनाशक्तौ संख्यायनः
दिवापदाहृतेनोयेन कृत्वा स्वर्णयुतेन तु रात्रिस्नाने तु संप्राप्ते स्नायादनलसन्निधाविति ॥ जातक० र्मप्रयोजन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

155

मा ह॥ गुरुः॥ जातकर्म क्रियो कृत्यो नृजातु श्री विरुद्धये॥ महदोषविनाशाय सूनुकायुमविच्छेदे॥ कुमारस्य हृता
शाय पुंसा सत्व विरुद्धये इति॥ वशिष्ठेन मासनामान्युक्तानि॥ चैत्रादिमासनामानि वैकुंठश्च जनार्दनः उपेंद्रो य
ज्ञपुरुषो वासुदेवस्तथा हरिः॥ योगीशः पुंडरीकाक्षः कृष्णोनंतोच्युतस्तथा॥ चक्रधारीति चैतानि क्रमाद्दद्यात्मनीषि
णः इति॥ ११॥ अथ सूतिकास्नानमुहूर्तं वसंततिलकेनाह। श्लो०॥ पौष्णध्रुवेंदुकरवातहयेषु सूतीस्नानं समित्रजरवी
ज्यकुजेषु शस्तं॥ नार्द्राजयश्रुतिमघांतकमिश्रमूलत्वाष्ट्रेसलौरिचतुर्दशषड्विरिक्ततिथ्यां॥ १२॥ हस्ताश्विनीलघुनक्षत्रेषु
समित्रजरवीज्यकुजेषु अनुराधानक्षत्रसूर्यगुरुभौमवासरसहितेषु प्रसूत्याः स्नानं शस्तं॥ आर्द्रादिषु न शस्तं बु
धशनिवासरे च श्रवणमघाभरणीचतुर्दशीषष्ठीअष्टमीद्वादशीरिक्तातिथिषु च न शस्तं। अन्यपानमुहूर्तं देवस्तेवत्सभे॥ रिक्तां भौ
मं परित्यज्य विष्टिपातं सवैधृतं॥ मृदुध्रुवक्षिप्रभे पुष्ये स्तनपानं हि जीविनां॥ १३॥ अथ प्रसंगात् प्रथमादिमासो
त्पन्नदंतफलं शार्दूलविक्रीडितेनाह॥ श्लो०॥ मासे चेत्प्रथमे भवेत्सदशनो बालो विनश्येत्स्वयं॥ हन्यात्स क्रमतो
नुजातभगिनीमात्रग्रजान्व्यादिके॥ षष्ठादौ लभते हि भोगमतुलं तातात्सुखं पुष्टतां॥ लक्ष्मीं सौख्यमथो जनौ
सदंतो सदशनोर्ध्वं च पित्रादिहा॥ १४॥ टी०॥ बालस्य जन्मोत्तरं प्रथमादिमासे षु अप्रतुलं भोगं लभते सप्तमे तातालिः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

८१ सुखं अष्टमे पुष्टतां॥ नवमे लक्ष्मीं दशमे सौख्यं अन्येपि सुखार्थिकामेव॥ अर्घो इति। अर्घे जनो जन्मकालाद्वत्सरद्वयात: 156
दंतयुक्तस्य पित्रादिना॥ स्वमातामातेपितरं च आदिशब्दात् मातरमपि नाशयतीति। स्वपित्रादिना चोर्द्धमेति॥ अथवा ऊर्ध्व
ऊर्ध्वसंयुक्तं जन्मानंतरं विहिते निषिद्धे पितृकाले राज्ञान श्रेयस्यान्नपि स्वपित्रादिना आत्मपितृनाशकइति। उक्तं च वसिष्ठ
मौनते॥ उपरिष्ठपंक्त्यस्य जायते च शिशोर्द्विजः॥ तैवी सहचवस्य स्यात् जन्म भार्गवसत्तम॥ मातरं पितरं वापरवादि
दात्मानमेव चेति॥ तत्रैव शांतिरिति। गजपृष्ठगतं बालं नौस्थं वा स्नापयेद्द्विजः॥ तदभावे तु धर्मज्ञ कांचनेनवना
सने॥ सर्वौषधैः सर्वगंधैर्बीजैः पुष्पैः फलैस्तथा॥ पंचगव्येन रत्नैश्च प्रमृत्तिकाभिश्च भार्गव। स्थालीपाकेन धाता
रं पूजयेत्तदनंतरं समाहुत्यां शकते व्यय पाक्ष्या ब्राह्मणभोजनं। अष्टमेहनि विप्राणां तु पादेया च दक्षिणा॥ कांचनं
रजतं गा भूमुवं चासनमेव च॥ २॥ इति दंतजननशांतिः। अथ दोलाचक्रमनुष्टुभाह॥ श्लो०॥ दोलारोहे र्कभात्त्रं
चषारवेचेषुसप्तमैः॥ नैरुज्यं मरणं कार्श्यं व्याधिः सौख्यं क्रमाच्छिशोः॥ २४॥ दोलेति॥ बालस्य दोलारोहणे (
स्याप ते अर्कभात्त्र्यां कांभानमात्येच नक्षत्रे नैरुज्यं तदग्रे पंचभिर्मरणं तदनंतरं पंचभिर्देहकार्श्यं स्यात्॥
तदग्रे रिपुभैर्व्याधिरोगः ततः सप्तभैः सौख्यं स्यात् शिशोरेवफलं संस्कार्ये त्वात्॥ उक्तं॥ सूर्यभाद्वेदभं याव
वत्त्रयं च मेचचतुर्दिशं॥ मध्ये त्रयं मंदं पानि होलिकाचक्रमुत्तमं॥ पूर्वभागे निरोगित्वं दक्षिणे मरणं ध्रुवं॥ पश्चि
८१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेनुक्षोवालउत्तरेच्याधिसंभव॥ शेषेष्वस्त्यधिले छुवासर्वः शायते सुखावाप्तिः॥१५॥ अथ दोलारोहणमुहूर्त्तवसं 157
न्ततिलकेऽर्भकोऽर्थे नोत्तरार्धे न निःक्रमणमुहूर्त्तं चाह॥ श्लो०॥ दंतार्कभूपधृतिदिग्मितवासरेस्या द्वारे शुभे मृदुलघुध्रुवभैः
शिशूनां॥ दोलाधिरूढिरथ निःक्रमणं चतुर्थमासे तमोक्तसमयेऽर्कमिते न्हि वा सतू॥ ३२ दंता ३२ अर्क १२ भूप १६ धृति १८ दिक् १०
एतन्मितदिवसे तथा शुभमैरे मृदुध्रुवनक्षत्रे स्पलदिते वालानां दोलाधिरूढिः स्यात्॥ अथ चतुर्थमासे तमोक्तसमये यात्राप्रकरणो
क्तसमीचीनकाले शिशूनां निःक्रमणं द्वेषसंस्कारपूर्वकं गृहाधिरूढिर्गमनं स्यात्॥ वा०॥ अथवार्कमिते न्हि द्वादशे दिने कुर्या
त्॥ मुख्यानिःक्रमणं सूनोश्चतुर्थमासि कारयेत्॥ यात्रोक्तसमये मासि तत्तीये द्वादशेऽन्हि वेति गुरुवचनात्॥ अथ जलपूजा
मुहूर्त्तं भुजंगप्रयातेनाह॥ श्लो०॥ कवीज्यास्तचैत्राधिमासे न षोषेज्जलं पूजयेत्सूतिकामाससपूर्णौ॥ बुधेंद्विज्यवारे विरिक्तेति
थौ हि श्रुतीज्यादितींद्वर्कनैर्मृत्यमैत्रैः॥१६॥ शुक्रगुर्वौरस्ते चैत्रे अधिमासे षष्ठे मासपूर्तौ मासस्समाप्तौ सूतिका प्रसूता स्त्री
जलेन पूजयेत्॥ एतद्भिन्ने काले तथा बुधचंद्रगुरुवारे रिक्तावर्जिते तिथौ हि निश्चितं॥ श्रवणपुष्यपुनर्वसुमृगहस्तमू
लअनुराधादिभिर्नक्षत्रैः सहिते दिने॥ अथ कचिदुग्धपानमुहूर्त्तः॥ एकत्रिंशे वासरे वा द्वितीये जन्मदैवे पापशुकृष्णलग्नेनु
कूले॥ शंखे दीर्घे सन्निदुग्धान्छि शुनां वक्त्रे धात्री पूज्यो विधाय॥१६॥ अथान्नप्राशनस्य मुहूर्त्तमाह॥ श्लो०॥ रिक्ता
नंदाष्टदर्शोहरि दिवसमथो सौरिभौमार्कवारान्॥ लग्नं जन्मर्क्षलग्नात् ष्टमलवमहगं मीनमेषालिकं च॥ हित्वा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१५८

९ षष्ठात्समे मासि स्याद्विहिमगर्भस्यां पंचमादौ जमासे नक्षत्रैः स्यात्स्थिराख्यैः सम्मृदुलघुचरैर्बालकान्नाशनं सत् ॥२७॥ टी० ॥ द्विकानंदेति ॥
अथोनिः क्रमप्राप्तं अनंतरमेव विधेः कालो बालकानां अन्नप्राशने प्रथमभोजने सत्शुभं स्यात् ॥ तत्रैतान् हित्वा एते वर्ज्याः रिक्ताः ४
९ । १४ ॥ नंदा १ । ६ । ११ अष्टमी ८ दर्शः ३० ॥ हरिदिवसं द्वादशी १२ ऋतुपर्वतगणत्वाति थिलयं हित्वा ॥ शनिभौमरविवाराश्च हित्वा जन्म
र्क्षलग्नाष्टमगृहे लग्नेचहित्वा जन्मर्क्षे जन्मलग्नेनाभ्यां मरणमग्रह मरणमलवेः । एम नवे प्राप्तो गच्छति प्राप्नोति ॥ एवं विधं
लग्नंत्यजेदित्यर्थः ॥ जन्मराशिविलग्नाभ्यां नैधने शोच वर्जयेत् इति काश्यपोक्तेः ॥ तथा मीनमेषालिके च अलिर्वृश्चि
कः एतानि लग्नानि हित्वा गोष्ठकुंभतुलाकन्यासिंहकर्कमिथुनकाः ॥ शुभदाः प्रायश्चेतेन मीनमेषवृश्चिकाः ॥ इतिक
श्यपेनोक्ताः ॥ षष्ठादिति ॥ षष्ठमासमारभ्य समे मासे षष्ठाष्टमदशमासेषु बालानामन्नप्राशनं कार्यं ॥ शुबालविषय
मेतत् ॥ अथानंतरं महिलेश्रियेन मगधां कन्यानां पंचमादौ जमासे पंचमसप्तमनवमैकादशेषु अन्नप्राशने
तथा च वसिष्ठः ॥ युग्मेषु मासेषु च षष्ठमासात्संवत्सरे वा नियतेष्टितः स्यात् ॥ अयुग्ममासेषु च कन्यकानां नवान्नसंप्राश
लय दुःखितां ॥ इति कुम्भप्रार्थना ॥ अश्वत्थविवाहे पितृत्रैव द्विजानां गुरूणां सह ज्ञातिभिर्मङ्गलोच्चारणैः समं ॥ अश्वत्थोद्वाहकाले
चरस्यमस्मो ऽसि मेडपे ॥ गत्वा प्रणम्य भौरीं च गणनाथं च भस्करं ॥ भवानीं चैव मे ध्यानं पितामहमनुमुदीरयेत् ॥ उद्वाहविष्णुविधिव
दश्वत्थेन मनोहरं ॥ कन्यासौभाग्यसौख्यार्थं हे तवेह द्विजोत्तमाः ॥ नमस्ते विष्णुरूपाय जगदानन्दहेतवे ॥ पितृदेवमनुष्याणां

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

९८ पद्मपायनमोनमः॥ वन्दनां यत्नये तुभ्यं विष्णुरूपाय भूरुह॥ नमो निखिलपापौघनाशनमोनमः॥ पूर्वजन्मकृते पापे वा

लवैधव्यकारकं॥ नाशयाशु सुखं देहि वंध्यायां मम भूरुह॥ इत्युपप्रम्य सविवाहे सेकल्पं प्रार्थनं॥ विवाहस्य कुंभविवाहव

द्विधेयः॥ एवमेव सौवर्णीं विष्णुप्रतिमां यया सह विवाहं विधाय प्रतिमां ब्राह्मणाय दद्यात्॥ दानप्रकरणं तत्रैव शुभे मासे सि

तेपक्षे सानुकूले ग्रहे दिने॥ ब्राह्मणं साधुमामंत्र्य संपूज्य विविधार्हणैः॥ तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजां॥ सुवर्णेन सु

वर्णेन वित्तशाठ्यविवर्जितः॥ निर्मितां सुचिरं शोभे गदाचक्राब्जसंयुतां॥ दधानां वाससी पीते कुमुद्योत्पलमालिनीं॥ स

रलिपिं च तां दद्यान्मंत्रमेतदुदीरयेत्॥ यन्मया पूर्वजन्मनि वि– त्यापनिसमागमं॥ विधोपनिषदाख्या येहितो वा तिविरलया

प्राप्यमाणं मयाघोरं पुंसः सोऽयं धनापहं॥ वैधव्यादिदुःखौघनाशाय सुखलब्धये॥ बहुसौभाग्यलब्ध्यै च महाविष्णोरि

मां तनुं॥ सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज॥ अनघास्याहमस्मीति त्रिवारं प्रवदेद्धि॥ एवमास्त्विति विप्रोऽपि गृही

त्वा स्वगृहं विशेत्॥ ततो वैवाहिकीं नानाविधिं कुर्याद्यथाहर्षा॥ इति प्रतिमादानविधिः॥ एवं घटादिभिः सह विवाहं कृत्वा ते वि

धाय पुष्पाक्षतादिसंघोषपुरःसरं पित्रादिः कन्यामापुधात्रे वराय दद्यात्॥ अत्र पुनर्विवाहान्न पुनर्भूदोषो न भवति॥ यतो वि

धानखंडे॥ स्वर्णाम्बु पिप्पलानां च प्रतिमा विष्णुरूपिणी॥ तया सह विवाहे च पुनर्भूत्वं न जायते॥ इत्युक्तत्वात्॥ च कारात्

घटस्यापि॥ लक्ष्मीरूपा सदा कन्या हरिरूपे सदा जले॥ ह[illegible]त्ते चयदाने दातुः पापहरं सदा॥ लक्ष्मीनारायणप्रीत्यै पदत्ता ९८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कन्याकाव्युधेः॥ तारयेसकुलं दानुपरं पूर्वापरं सदा॥ चेदग्न्या लांतुगं धर्वे शिवसोऽस्मरादूमेपतयः कन्यकानां चवास्त्वाल्लेतिसदै
वतै॥ तदुद्वाहविधिं यत्नात्कुलीनो ज्ञनयेदेव यथा मिपुलकमलेदेवानां पूजनाय वै॥ अहं भवति सर्वत्र तथा कन्यादानं भवेत्॥ श्रु
तावपि सोमादिभिः सह विवाहो मिहितः। सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः। तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजः इति॥ अतो दे
वतभोग्यानां कन्यानां पुरुषविवाहे न दोषः॥ पुनर्भूभक्षणपात्रापि। अतएव पित्रा माभ्रातपाभ्राताद्वा यातो यथा रथा॥ विवाहि
सुहृदां साक्ष्यं कृत्वा सोद्वाहिता भवेत्॥ कात्यायनादिपरिभाषितत्वादेकदा कन्यापुरुषविवाहे निर्दिष्टे पुनर्द्वितीयपुरुषविवाहे
जाते सा पुनर्भूरेव स्यात्॥ इति विवाहप्रकरणे सप्तमैश्लोकाः समाप्तागताः॥ १॥ अथान्यत्साधारणाह॥ श्लो०॥ अथ भल्लप्र
लपेयाद्दशापत्यपुरुषं यथा कामिनी तत्र चेतावुद्भजेत्॥ कन्यका भासुतोवालदायं इतैस्ताद्दशापत्यमस्या विनिर्दिश्यते॥ ८॥ जल्मेता॥ तत्रज्योतिर्विस
मीयः। याद्दशापत्यमेव विवृणुते कन्यके तादृशो अस्य वै॥ ८॥ अथ सामान्यतो भिन्न॥ वशेन शुभाशुभप्रश्नस्ताविवाह॥ श्लो०॥ रोरवमेरी विपंची
रवैर्मंगलं जायते वैपरीत्यं तदा लक्षयेत्॥ वायसो वा खरः श्वा शृगालो पिवा प्रभिलक्ष्य नदत्यश्वरो तिनादं वदि॥ ९॥ शरेवेति॥ विपंचीवीणा हस्ते यो
रवैः प्रलग्नश्रुतैर्मंगलं जायते॥ उपलक्षणत्वात् मनोत्साहादि तुरंगछत्रासनानि ध्वपि शुभं॥ अथाशुभयोगवैपरीत्यमिति॥ वायसः काकः
खरः श्वा शृगालः असिद्धोपदितास्मिन् लक्षणे वायसादिनाद करोति तदा वैपरीत्यमशुभं लक्षयेत्॥ उपलक्षणत्वादुलूकोऽशुभहिंसनादोष्य
शुभः॥ अन्ये शुभाशुभयोगा शौनकादिभ्यो ज्ञेयाः॥ विवाहवत्तावनेउपयुक्ताः निरूपिताः॥ भवेो भा सूत्रपूर्तितेगणपतिप्रस्थादि पात्रे शनैः स
न्यासे न्यधिवेद्विले पूर्वतय कल्निश्चय कन्यानिधिं॥ निर्यातारत्नकादिवे मम्प्युकरेकत्वान मभ्यर्चितं॥ वावावप्र पुरुष दयस द

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

९९ शीलेके किलोपक्रुतिः ॥ तन्मंत्रस्याउपक्रुतिमहादेवि वां गलग्रहवासिनि ॥ यथार्थबुद्धि देवित्वं शंकराज्यसवर्धनी ॥ ९९ ॥ अथ कन्यावरणेमु
हूर्तमनुमस्पृदकं च दर्साह ॥ श्लो० ॥ विश्वस्वातीवैश्रवपूर्वात्रयमैत्रवह्न्याग्नेयैर्वाकरपीडोचितस्थलैः ॥ वस्त्रालंकारादिसमेतः फलपुष्पैः सं
तोष्यादौ स्यादनुकन्यावरणं हि ॥ १० ॥ वस्त्रालंकारादि शब्देन रत्नायादि मधुरवस्तुभिः सहितैः पुष्पफलैः रादौ कन्यां संतोषयित्वा
ऽनुपश्चात्कन्यावरणं हि निश्चयेन स्यात् ॥ कन्यावरयोरुत्तलग्नानिस्कमधूदिकाध्यायादवगंतव्यानि ॥ १० ॥ अथ नरवरणमुहूर्त
माह ॥ श्लो० ॥ धरणिदेवोथवा कन्यकासोदरः शुभदिने गीतवाद्यादिभिः संयुतः ॥ वरवृतिं वस्त्रयज्ञोपवीतादिना ध्रुवयुतैर्वह्नि
पूर्वात्रये साचरेत् ॥ ११ ॥ धरणिदेवो ब्राह्मणः पुरोहितादि ॥ चंडेश्वरः ॥ पूर्वात्रितयमग्नेयउत्तरत्रितयंतथा ॥ रोहिणी तत्र वरणेम
गणशस्यते तदा ॥ उपवीतफलेपुष्पवासांसि विविधानि च ॥ देयं वराय वरणे कन्याभ्राताद्विजेन वेति ॥ १२ ॥ अथ कन्याविवाहकाले
ग्रहशुद्धिं च वसंतमालिका छंदसाह ॥ श्लो० ॥ गुरुशुद्धवसेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टात् ॥ रविशुद्धवशात्क्रमोवरा
णाममपोह्यैंद्रविशुद्धितो विवाहः ॥ १३ ॥ कन्यकानां विवाहः षडब्दकोपरिष्टात् ॥ षड्वर्षातिक्रमानंतरं समवर्षेषु कुंभवर्षेषु (
सत्सु कुंभवर्षेषु सत्सु व [illegible] कन्या जन्मराशेर्लिग्रुल्यस्त्रुभौ सत्यां विवाहः शुभः ॥ अथ पुरुषाणां विषमवर्षेषु गोचरप्रक
रणोक्तइति शुद्धौ सत्यां विवाहः शुभः ॥ राजमार्तंडः ॥ तृतीयषष्ठगश्चैवदशमैकादशाः स्थितः ॥ रविशुद्धो निगदितो वरस्यैव क
रग्रहे ॥ जन्मस्थश्च द्वितीयस्थः पंचमे सप्तमे पिता ॥ नवमेभास्करेपूज्यं कथितः पाणिग्रहोत्सवैः ॥ चतुर्थे चाष्टमे चैव द्वादशे भास्क
रे स्थिते ॥ वरः प्रेतत्वमाप्नोति कृतेपाणिग्रहोत्सवे ॥ इति यतउक्तं ॥ षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः ॥ सोमोभुंक्ते ९९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथांयथं वसतः ॥ पञ्चाङ्गुलाग्रान्वहति ॥ व्यासः ॥ अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ॥ दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ गौरी
रद्दुल्ललोकं सावित्रं रोहिणीं ददत् ॥ कन्यां ददत्स्वर्गलोकमतः परमसद्गतिं ॥ प्राप्नोतीति शेषः ॥ अत्र युग्मे वेदजन्मतः स्त्रीणां शु
भंदं पाणिपीडनमिति युक्तत्वात् ॥ नववर्षा या रोहिणी एषा अयुग्मवर्षत्वाद्विवाहनिषेधः ॥ प्राप्नोतीत्यत्र व्यवस्थामाह ॥ श्रीपतिः
मासत्रयादूर्ध्वमयुग्मवर्षे युग्मे तु मासत्रयमेव यावत् ॥ विवाहशुद्धिं प्रवदन्ति सन्तो वात्स्यादयो गर्गमुखा विवाहशुद्ध्या ॥ इत्यलो
नववर्षस्यायुग्मत्वान्निषेधो दशवर्षानंतरं मासत्रयवर्ज्यं तमेवतद्नंतरं तु शुभत्वेन विवाहस्याविरोधः ॥ एवं च अष्टवर्षानं
तरं जन्मतो विषमवर्षा या मासत्रयानंतरं नव मासाः शुभाः ॥ सप्तवर्षे आद्यमासत्रयं चेत् गर्भतो युग्मवर्ष इति निष्कर्षोपि
अयोरपि ॥ स्त्रीपुंसयोरंशशुद्धितो विवाहः शुभः ॥ उभयोरंशद्वबलमावश्यकमित्यर्थः ॥ शुद्धिगोचरेण निश्चितागोचरब
लाभावे अष्टकवर्गादिबलं ग्राह्यमित्याह ॥ नारदः ॥ गोचरं वेधजं चाष्टवर्गजं --- बलं ॥ यथोत्तरबलाधिक्यं स्थूलं
गोचरमार्गेणमिति ॥ व्यासः ॥ गुरुशुद्धिः स्याद्दशवर्षावधि स्मृता ॥ दशवर्षव्यतिक्रान्ता कन्या शुद्धिविवर्जिता ॥ त
स्मात्संवत्सरे रेतुल्ये कन्यानां शुद्धौ पाणिग्रहो मतः ॥ १३ ॥ अथ विवाहहितमासान् तत्केलितेनाह ॥ मिथुनकुंभमृगालिवृषाजगे
मिथुनगेपि रवौ त्रिलवे शुभे ॥ अलिमृगाजगते करपीडनं भवति कार्तिकपौषमधुष्वपि ॥ १४ ॥ अलिरिति ॥ अलिमृगाजगतेरवौ त्रिलवे
भागते रवौ सति ॥ तत्रापि मिथुनास्थिते रवौ सति ॥ शुचेः आषाढस्य त्रिलवे तृतीयांशे आषाढशुद्धप्रतिपदारभ्य मिथुन

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

196

१० गेर्के पिहरिशयने विवाहो न स्यात्॥ अस्तीति॥ एतद्वारिंगे सूर्ये कार्तिकपौषमधुष्वपि करपीडनं स्यात्॥ वृश्चिके कार्तिके मकरे
मु.री. पौषे चैत्रे मीनस्थे॥ इदं तु सौरमासग्रहणे मतं॥ श्रीधरेपि॥ पौषेपि कुर्यान्मकरस्थितेर्के भवे न्मेषगतोपदस्यात्॥ प्रश
स्तमाघादरुते विवाहे चेदिति कर्केमिथुनास्थितेर्के इति येनु चांद्रमासानेवाहुर्मौरदेंदाहदयं॥ माघफाल्गुनवैशाखज्येष्ठमा
साः शुभप्रदाः॥ मध्यमा कार्तिके मार्गशीर्षे वै निंदिताः परे इति तेषां मते फाल्गुनो विहित इति॥ तन्मीनसंक्रमणसंभवेपि शु
भः॥ चैत्रो निषिद्ध इति मेषसंक्रमणसंभवेपि शुभः। तदुक्तं देवले॥ तत्र नारदः॥ पात्रे दाहव्रतदौरतिथिवर्षेशनिर्णया
पर्वं वास्तुपवासादिकं तु चांद्रेण गृह्यते॥ रूपोनंनिंद्योपदि फाल्गुने स्यादजस्थे वैशाखगतो न निंद्यः॥ मध्याश्रितौ द्वावपि वर्जनी
याविति अजस्थे वैशाखगतो न निंद्य इति निर्मूलमेव। वस्तुतस्तु॥ वशिष्ठेन उभयमासविधानात्सौरचांद्रमासे कोप्युत्तमो वि
वाहः॥ एकतरपक्षाश्रयेण न मध्यः दिनाधिपे मेषे वृषेकालिकुंभनतुभमनक्रान्स्यधरदे सदेवे॥ माघद्वये माधवशुक्रयोश्च
मृगस्य चाघवा कार्तिकसौम्ययोश्चेति॥ उपप्रसंगात्सौरचांद्रमासविधायकवचनानि तेषां व्यवस्था च लिख्यते॥ स्वयंभूः॥
विवाहव्रतयज्ञेषु सौरो मासः प्रशस्यते॥ गर्गोपि। विवाहोत्सवयज्ञेषु सौरमानं प्रशस्यते॥ वृद्धगर्गः॥ विवाहादौ स्मृतः (
सौरो यज्ञादौ सावनो मतः॥ इत्येवमादीनि सौरमासविधायकानि तथा च॥ वशिष्ठः॥ उद्वाहयज्ञोपनयनप्रतिष्ठातिथि
व्रतदौरमहोत्सवाद्यं॥ पर्वक्रियावास्तुगृहप्रवेशाः सर्वे हि चांद्रेण विमृश्यते॥ इत्यादीनि तत्रैकतरमासावलंबने पर १००

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

197

वैपरीत्यस्यादित्यत्र समाधीयते। यत्र सौरचान्द्रमासाभ्यां मासस्पृग्दिनं संपद्यते उत्तमो विवाहः॥ एकतरपक्षावलंबने मध्यमः स्पृक्
ह्याकू मध्यमपक्षावलंबने च स्पृष्टद्वयं मासस्पृग्दिनं संपद्यते उत्तमो विवाहः॥ संदेहकन्याविषये वेदितव्यं॥ अपरे पुनर्देशविभेदेन मासस्य
वस्यामाहुः॥ तथा च तत्पक्षद्वयमध्ये चान्द्रो मासः प्रशस्यते॥ अन्येषु सर्वदेशेषु सौरो बहुलविवाहयोः॥ तथा विंध्याद्रेर्दक्षिणे भागे चान्द्रो
मासः प्रशस्यते॥ अन्येषु सर्वदेशेषु सौरो व्रतविवाहयोः॥ उदग्भागे च विंध्यस्य सौरमानं विधीयते॥ अन्येषु मिश्रमानेन कल्पये
त्॥१२॥ अथ मासप्रसंगाज्जन्ममासादिषु उक्तनिषेधविधी स्पष्टयति वाह॥ श्लो०॥ आद्यगर्भसुतकन्ययोर्द्वयोर्जन्ममासभतिथौ
करग्रहः॥ नोचितोथ सबुधैः प्रशस्यते। चेद्द्वितीयजनुषोः सुतप्रदः॥१३॥ आद्येति॥ यस्मिन् मासे चान्द्रे जन्म मासः जन्मतिथिमा
रभ्यात्रिंशद्दिनपर्यन्तं को मासो जन्ममासोथ यत्र मासे जन्म स जन्ममासो नेत्युच्यते॥ पक्षद्वयमपि परमकरणे प्रतिपादितं जन्मनक्षत्रेज ३
न्मतिथिः समाहारद्वंद्वः। जन्ममुहूर्तो पि तत्राद्यगर्भयोः सुतकन्ययोर्द्वयोः करग्रहो विवाहो नोचितः निषिद्धः॥ वशिष्ठः॥ स्वजन्ममा
सर्क्षतिथिषु ज्येष्ठजैः नाशिकाः पटलहेतुचेवं॥ नोद्वाहमाकार्षुद्याग्निकोहीनैवाप्यगर्भह्निनये कदाचित्॥ एतद्गर्गदोषः॥ जाते
दिने प्रयते वशिष्ठ इत्यादि पूर्वमुक्तेः॥ द्वितीयजनुषोरनाद्यगर्भयोर्द्विवाहस्तर्हि सुतप्रदो निबुधैः पंडितैः प्रशस्यते॥ अत्राद्यग
र्भशब्देन सर्वेषामविवक्षितेति॥ अथ वा वेदनाद्यजनुषो द्वितीयेति पठितव्यं॥ तथा च्यवनः॥ जन्मर्क्षे जन्ममासे च जातानामप्यजन्मनि॥ जन्मे
लग्ने भवेद्रूढा पुत्राचपतिवल्लभेति॥ एतस्मिन्नाद्यगर्भविषये माद्यगर्भस्याहानि जेष्ठात्॥१४॥ ज्येष्ठमासे विशेषमाह शालिन्याह॥ श्लो॥
ज्येष्ठद्वंद्वं मध्यमं संप्रदिष्टं त्रिज्येष्ठं चैव नैव युक्तं कदापि॥ केचित्सूर्यं वह्निगं प्रोह्य चाद्यं नैवान्योन्यं ज्येष्ठयोः स्याद्विवाहः॥१५॥
ज्येष्ठेति॥ पुत्रो ज्येष्ठः कन्या ज्येष्ठा मासोपि ज्येष्ठः इत्येतत्त्रिज्येष्ठं तत्कदापि नैव युक्तं॥ ज्येष्ठमासे ज्येष्ठयोर्वरवध्वोर्विना

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

९१ हेनैव कार्य इत्यर्थः ॥ यदा त्वेकतरज्येष्ठत्वं ज्येष्ठमासो भवति ॥ तदा मध्यमं संप्रदिष्टं । अगर्गीति विकल्प इति विस्तरार्थः । एको ज्येष्ठ मन्यद्वयम
ज्येष्ठं तथाशुभमेव ॥ वाग्नाहः ॥ द्वौ ज्येष्ठौ मध्यमौ प्रोक्तौ एकज्येष्ठः शुभावहः । ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतं ॥ अस्यापवादमाहः
मु॰ दी॰ केचिदिति ॥ सत्यावृत्तः कृत्तिकास्थे वह्नौ गते कृत्तिकास्थे स्वर्के ज्येष्ठमासे पि ज्येष्ठवरस्य कन्यकायाश्च विवाहः शुभ इति केचिदूचुः ए
तच्च ज्येष्ठापत्यस्य ज्येष्ठे इति सामान्यतो मंगलकृत्यनिषेधो विद्यते ॥ भारद्वाजः ॥ ज्येष्ठे ज्येष्ठस्य कुर्वीत मासर्क्षे दानलाभिते
पा. नोऽसवा दिनिकायां दिनानि दद्यान्तु ये दिति ॥ अत्र ज्येष्ठपुत्रदुहित्रोः ज्येष्ठमासवर्ज्यत्वं ... मंगलकृत्यनिषेधमाह भारद्वा
जः ॥ मार्गशीर्षे तथा ज्येष्ठे क्षौरं परिणयं व्रतं ॥ आद्यगर्भदुहितृपुत्रयोर्नैव परिवर्जयेत् ॥ इति ॥ स्वयमपि ज्येष्ठापत्यस्य ज्येष्ठे क्षि
न्मार्गेपि नेष्यत इत्युक्तं प्राक् ॥ कौत्सः ... आदिति सच पितृ ॥ नैवान्यो न्यमिति ॥ ज्येष्ठायाः कन्यायाः ज्येष्ठपुत्रेण सह
विवाहो नैव स्यात् ॥ गर्गः ॥ ज्येष्ठायाः कन्यकायाश्च ज्येष्ठपुत्रस्य वैमिथः ॥ विवाहो नैव कर्तव्यो यदि स्यान्निधनं तयोरिति ॥ २५ ॥
अथान्यविशेषं हरणीछंदसाह ॥ श्लो ॥ सुतपरिणयात्षण्मासांतः सुताकरपीडनं न च निजकुले तद्वाभेडस्तदपि मुंडने ॥ न च स
हजसुतयोर्देयं भ्रात्रोः सहोदरकन्यके न च सहजसुतोद्वाहोऽब्दार्धे शुभे न पितृक्रिया ॥ २६ ॥ सुतपरिणयादिति ॥ निजकुले इति देह
लीदीपन्यायेनात्र संबध्यते ॥ निजकुले स्ववंशे सुतस्य पुत्रस्य परिणयात् षण्मासमध्ये सुताकरपीडनं कन्याविवाहो न स्यात् ॥
नारदः ॥ पुत्रोद्वाहात्परं पुत्री विवाहो न स्यात् ऋतुत्रये । न तयोर्व्रतमुद्वाहान्मंडनादपि मुंडनमिति ॥ निजकुले त्रिपुरुषमध्ये पुत्रस्य कन्य
या न मुंडनादि विवाहात् मंडने चौलमुपनयनं समावर्तनादि वा तद्वत् षण्मासमध्ये न कार्यं ॥ अत्र ... ॥ कुलेऽपि तु त्रयाद्वाक् मुंड
नान्न तु मुंडनमिति ॥ अत्र विशेषः ॥ श्रीधरीये ॥ व्रतसमावर्तनकर्णवेधचौलकेशान्तनामानि वदंति ॥ गर्गः ॥ ... पुरस्तात्षण्मव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तव स्याच्चत्वारि तस्मादिह मंडनानि। द्वन्द्वसमेतके यांत विवाहोपनयाद्युधाः॥ गुरुमंगलमित्याहुरन्यल्लघुमंगलं॥ ज्येष्ठं कृत्वानुवर्णान्से
नकुर्यो लघुमंगलं॥ कुर्वन्ति मुनयः केचिदन्यास्मिन्न पिवत्सरे॥ लघु वा गुरु वा कार्यं कार्यं मे मित्तकं हि यत्॥ पुत्रोद्वाहः प्रवेशाख्यः कन्यो
द्वाहस्तु निर्गमः॥ मुंडनं चौलमित्युक्तं व्रतोद्वाहो तु मंगलं॥ चौलं मुंडनमेतं च वर्जयेत्॥ वरणान्यैः नमौंजीतूभयतः कार्योपनमौंजीनमुं
डने। अभिन्नेवत्सरे विस्पाल तदहस्तत्र भेदयेत्॥ अभेदो देवससा पिनकुर्यादेकमंडपे इति॥ एषां समूलस्त्वेदशाकालसंकटे सति बोध
व्यो॥ उक्तंचा॥ एकोदरयोद्वयोरेकदिनेद्वाहे नेमभेन्नाग्रहः॥ न चैतनरणकदिने व्याकुः संकटेचव्रतभो नप्रति छिद्र लग्ने संप्राप्ते संकटे महति॥ द्व
दरसंभवयोरेकाहे भिन्नमंडपेकाले इति॥ न चेति। सहजयोः सोदरयोः भ्रात्रोः सहोदरकन्यकेन देये नोद्वाहे॥ नारदः॥ न चैक जन्मनोः
पुंसोरेकजन्मेतु कन्यके॥ नैनैकदाचिदुद्वाहो नैकदा मुंडनद्वयमिति॥ अत्र च कारेणुक समुच्चयार्थि रनेनैकस्मै वराय सहोदर कंन्या
द्वयमपि नदेयं। नपुत्री यैद्वयं एकस्मै पद्यान्तु कदाचनेति॥ वसिष्ठेपि॥ नसहजसुतोद्वाहोऽद्वार्ध इति। सुतश्च सुतश्च सुतौ॥ सुता च सु
ता च सुते॥ स्वरूपाणामेकशेष इत्येकशेषः॥ सुता च सुतश्च सुतौ पुमान् स्त्रियेत्येकशेषः॥ सुतौ च सुते च सुतौ चेति सुतौ इति॥ दृतै
कशेषाणां द्वंद्वं पुमान् स्त्रियेत्येकशेषसहजन्याते सुतां स्त्रेति॥ कर्मधारयः॥ तेषां सोदरभ्रातॄणां विवाहः॥ अब्दार्धे परमास समध्ये
नकार्यः॥ उद्वाहस्तु पलक्षणं॥ तत्र स्त्रेकमात्रजयोः पुत्रयोः कन्ययोर्वे समानसंस्कारो न कार्यः॥ वृद्धमनुः॥ एकमातृजयोरेकं
वत्सरे पुरुषस्त्रियोः॥ नसमानक्रियां कुर्यान्मातृभेदे विधीयते॥ समानक्रिया मुंडनादि भिन्नमातृजयोः॥ समानक्रियाको नर्दा
कः॥ नारदः॥ समानापि क्रियाकार्या मातृभेदे तथैव च॥ विवाहे द्वित्तु कार्या न विवाहद्वयं दिनमिति॥ भिन्नमातृदुहितृविवाहः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

200

१२ सामानक्रियायामपि दिनचतुष्टयं मध्ये न कार्ये इत्यर्थः ॥ वसिष्ठेन विशेष उक्तः ॥ एकोदरप्रसूतानां नात्र कार्यत्रयं भवेत् ॥ भिन्नोदरप्रसूता
नां नेति शातातपोऽब्रवीत् ॥ इति चौलोपनयनविवाहरूपं कार्यत्रयं ॥ आदौ चैव लंततस्तो मौंजी विवाहस्त्वशुभप्रदः ॥ मातृभेदे तु द्वेकस्मो मातुरे
कोनक हिंचित् ॥ एवं सति भिन्नोदरमंगलमात्रस्य पक्लेगृह भेदादेकगृहे आचार्यभेदाद्वा कार्यमेव ॥ वसिष्ठः ॥ द्विशोभनं त्वेकगृहेपि ने
ष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु ॥ आवश्यकं शोभनमुत्सवो वा द्वारे च वाचार्यविभेदतो वेति ॥ यमलजननयोस्त्वयमपि निषेधो
नास्ति ॥ एकस्मिन्वत्सरे चैव वासरे मंडपे तथा ॥ कर्तव्यं मंगलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ तत्र भेदानुक्रमेण कार्यं ज्येष्ठानु
क्रमस्तु गर्भोत्पत्तिक्रमेण ॥ तथा च भागवते ॥ तस्मिन्वर्षं दोःहरिण्याक्षहिरण्यकश्यपू जातौ ॥ प्रजापतिर्नाम तयोरकार्षीत् यः प्राक्
स्वदेहाद्यमयोरजायत ॥ तं हिरण्यकशिपुं प्रविदुः प्रजा यं तं हिरण्याक्षमसूत अग्रत इति ॥ तथा केचिद्यत्नेयं संहितायां ॥ यदि
शोवाद्विधा भूत्वा जीवो यमलयोः प्रविशेदितरत् ॥ तदा भवेद्द्विधा गर्भः सूतिश्चैव विपर्ययात् ॥ ते न यमयोर्जातः कनिष्ठः ॥ अनंतरं जातो
ज्येष्ठः ॥ अत एव भगवतोऽपि च गर्भे तु जन्मतो ज्येष्ठता मतेति भगवता गर्भे जन्मत इत्युक्ते ॥ जन्मज्येष्ठेन चाह्वानं सुब्राह्मण्यास्वपि
स्मृतिरिति ॥ मनुवचनेनैककोशजातयमलविषये ॥ तथा च देवलः ॥ यस्य जातस्य यमयोः ॥ बृहस्पतिः प्रथमं मुखं दृष्ट्वा संतानः पित
रश्चैव तस्मिन् ज्येष्ठ्यं प्रतिष्ठितमिति ॥ संतानो वेदाः यदा तु पुंसो वेलातिशयात् इत सोऽपि द्विधा जन्मेति ॥ तत्र स्त्रीणां विवाह उपन
यनस्थाने इति स्मृतेः ॥ कन्याविवाहस्य पुत्रोपनयनस्य च समानसंस्कारत्वमिति चेन्न ॥ अष्टवर्षं ब्राह्मणमुपनयेदि
तिवचने ब्राह्मणग्रहणात् कुमारमित्यनुवृत्ते स्त्रीपुंसाधारणो व्रतबंधनियमास्त्र ॥ यत्तु स्त्रीणां विवाह उपनयनस्थाने इत्य १२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तं॥ तथासौ द्विजत्वसिद्ध्यर्थं। अतः स्त्रीविवाहो विवाहः एतदुपनयनं तस्मात् सोदरकन्यापुत्रयोर्विवाहोपनयनयोः समानसं
स्कारत्वाभावात् एकाब्दमध्ये पितेकार्यं शुभमिति॥ शुभे विवाहादिमंगलकृत्ये पितृक्रिया श्राद्धक्रिया न कार्या॥ मंगले ना
प्यमंगलमिति नारदोक्तेः॥ अमंगलं श्राद्धं समाप्यैव मंगले कार्यं न मध्ये इत्यर्थः॥ अथ प्रतिकूलनिर्णयमिंद्रवंशयाह
श्लो॥ वध्वावरस्यापि कुले त्रिपूरुषे नाशं व्रजेत्कश्चन निश्चयोत्तरं॥ मासोत्तरं तत्र विवाह इष्यते शान्त्याथवा सूतकनिर्ग
मे परैः॥१२॥ वध्वेति॥ निश्चयोत्तरं। वाग्दानानंतरं वध्वाः कन्यायाः वरस्य वा कुले वंशे त्रिपूरुषे पुरुषत्रयमध्ये कश्चन
सपिंडो नाशं प्राप्नुयात्॥ त्रिमासोत्तरं मरणदिनादारभ्य त्रिंशाहिल प्रतिकूले ततः शांत्यावनुष्ठितया विवाहः सुखेनेष्यते।
इदं पित्रादिभिन्नविषयं॥ सोऽव्ययः॥ अन्येषां सपिंडानामाशौचे मासमिते॥ तदंते शांतिकं कृत्वा ततो लग्नं विधीयते॥ पि
त्रादिमरणे तु विशेषः पितृव्यस्त्री सुतो भ्राता भगिनी च विवाहिता॥ एभिरेव प्रयत्नेन (प्रतिकूलं) तेषां प्रतिकूले चेन्महा
विघ्नकरं भवेत्॥ पिता पितामहश्चैव माता वा पितामही॥ पितृव्यस्त्री सुतो भ्राता भगिनी च विवाहिता॥ एभिरेव प्रयत्नै
स्तु प्रतिकूलं बुधैः स्मृतं॥ वाग्दानानंतरे यत्र कुलयोः कस्यचिन्मृतिः॥ तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्॥ पि
तुरापौ वर्षमब्दं स्यात्तदर्द्धं मातुरेव हि मासत्रयं तु भार्याया स्तदर्द्धं भ्रातृपुत्रयोः॥ अन्यच्च॥ प्रतिकूले सपिंडस्य
मासमेकं विवर्जयेत्॥ विवाहस्तु तयोः पश्चात्तयोरेव विधीयते॥ दुर्भिक्षे राजभंगे च पित्रोर्वा प्राणसंशये॥ प्रौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

202

९२ तथाग्निविकन्यायां प्रतिकूलं न दुष्यति॥ दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च॥ उदास्यवृत्तिनैव प्रतिकूलेन विद्यते॥ से
कं दे समनुज्ञाते वा सवल्केन वोगिना॥ शांतिं कृत्वा गणेशस्य कल्याणं शुभमाचरेत्॥ अथ पाव भ्रपकल्वेय वादमाह॥ अ
च पवेति॥ अग्नौ निर्गमे शांत्यां त्वनुष्ठितायां विवाहः परे शाचार्यैर्दिष्यते॥ ज्योतिःप्रकाशे प्रतिकूले पि कर्त्तव्यो विवाहो मा
समंतरा॥ शांतिं विधाय गां दत्वा वाहनादि चरेद्बुधः॥२६॥ अथ प्रसंगादपि विशेषोत्तरमुपजानाहः॥ चूडाव्रतं चापि वि
वाहतो व्रताचूडा च नेशापुरुषत्रयांतरे॥ वध्वाप्रवेशाच्च सुताविनिर्गमः षण्मासिको चाब्दविभेदतः शुभः॥२७॥ टी०॥ अ
पिसब्दात्समावर्त्तनादि॥ चौलमुपनयनं समावर्त्तनं विवाहानंतरं पुरुषत्रयमध्ये एव नेष्टं॥ तथा व्रतादुपनयनात् चू
डापुरुषत्रयपर्यंतं नेष्टा॥ तथा वध्वाः प्रवेशात्सुताया विनिर्गमो पि पुरुषत्रयपर्यंतमेव नेष्टं॥ मेधातिथिः॥ पुरुषत्रयपर्यं
तं प्रतिकूलं सगोत्रिणां॥ प्रवेशनिर्गमो न कर्त्तव्यः॥ मुंडनं खंडने॥ इति तस्मात् कुलपुरुषस्य चतुर्थिके कार्ये दोषः॥ पुरुषत्र
ये पि षण्मासपर्यंतमेव॥ अत एव षण्मासादूर्ध्वं तिमासपर्यंतं रेवासो पि विवाहादि शुभः॥ एतन्मूलवाक्यं कुलेस्वलुत्रय
स्त्री गृहे स्यादित्यादिना प्रागुक्तं॥ अत्रापवादउच्यते॥ अथवा अब्दभेदात् भूमे दाविषण्मासमध्ये पि शुभः॥ यथा माघवि
वाहे वैशाखे चौलं यज्ञोपवीतं वा भवतीत्यर्थः॥ संहितासारावल्यां॥ फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनयनाय नेमेदाब्द
त्वं कुर्वीत नस्यन्तु त्रयेस्वेव न मिति॥२८॥ अथ मल्लादिदुष्टेन हस्तोत्तनयोर्वधूवरयोः ससुरादिपीडकत्वं च वसंततिल

९२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यकं तत्र श्लो०॥ ज्येष्ठादिना रामहिजो सुतं दो विधत्तः कन्यासुतो निरृतिजो श्वशुरं हंत ज्येष्ठा॥ ज्येष्ठा च जातं तनयं पाक्षधवा ग्रजं च शक्राग्निजा भवति देव
रनाशकर्त्री॥ ९२॥ टी०॥ अहिजो श्लेषापादनक्षत्रोत्पन्नो कन्या पुत्रो श्वश्रुसालादवरस्य मातुः कन्या या मातुः नाशं विधत्तः कुरुतः॥ तथा मूलो
त्पन्नो श्वशुरं हंतः॥ जननं कं जननीं हंति भर्तुर्मूलादि चित्तजे तिवधीश्लोके॥ तुल्यन्या पत्यानु॥ ज्येष्ठोत्पन्ना कन्या स्वधवाग्रजं भर्तुर्ज्येष्ठभ्रात
रं हंति॥ शक्राग्निजा विशाखोत्पन्ना देवरस्य भर्तुः कनिष्ठभ्रातुर्नाशकर्त्री॥ ऐंद्री पत्यग्रजं हंति देवरं तु द्विदैवजेति॥ ९३॥ एतदपवादमनु
ष्टुभाह॥ श्लो०॥ द्विशाखपादत्रयजा कन्या देवरसौख्यदा॥ मूलांत्यपादसार्पाद्यपदजौ तौ तयोः शुभौ॥ ९४॥ स्पष्टार्थः॥ न हंति देवरं कन्या सुतो श्वशुर
मेव च॥ नारद॥ सुता सुतो वा नियतं श्वसुरं हंति मूलजा॥ तदंत्यपादजौ नैव तथाश्लेषाद्यपादजा॥ इति पुरस्त्वमपि विशिखादितं॥ मूलेति निषेधः
मूलजो वधनाने तरं मूलाश्लेषादोषौ नास्तीत्युक्तं॥ मूलश्चालोमध्वोदोषः पुंसौ मौज्ञा विनश्यतीति भूपालवल्लभवचनादिति तेन मूलश्ले
षादोषः स्त्रीविषयः॥ यदेवज्योतिषे तथाज्येष्ठोत्पन्नः पुमान् भ्रातरमग्रजं वधे हंति॥ विशाखोत्पन्नः पत्नीनुजमनुजं भार्यं हंतीति तथा चकश्यप
ऐ स्वेपत्यामग्रजाभ्यामग्रजं वाहंति ज्येष्ठं लेगः पुमान्नृ॥ तथा अस्मोपानुजो चैव नानुजे हंति द्विदैवजस्तुकं॥ तस्यापरिहारस्तत्रैव मूलोत्पाद्ये जो श्लेषांत
पाजे पैत्रपादजे॥ द्वितीयत्वपादजो दुष्टो न तदन्ये खांत पादजा इति॥ ज्येष्ठाविशाखोत्पन्नस्य पुंसः दोषतत्परिहारनिरूपणं वकुंठेव्यद्ध
हूत्वादुपेक्षितं॥ ९५॥ अथाष्टकूटानां नामान्यनुष्टुभाह॥ वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकं॥ गणमैत्रं भकूटं च नाडी चैते गुणाधिकाः॥ १०॥
एते वर्णादिमैत्र्यंतो स्यो गुणाधिकाः एकादिगुणाधिकास्युः॥ यथा वर्णमैत्र्यामेको गुणः वश्यो द्वा वित्यादि॥ तत्रादौ वर्णकूटं भालिन्या
ह॥ श्लो०॥ द्विजाः झषालिकर्कटास्ततो नृपा विशोंघ्रिजाः॥ वरस्य वर्णतोधिका वधूर्न शस्यते तदा॥ १९॥ मीनकर्कटवृश्चिका द्विजा ब्राह्म
णाः ततोनंतरं मत्स्य मेषसिंहधनूराशयो नृपाः क्षत्रियाः॥ वृषकन्यामकराः विशो वैश्याः मिथुनतुलाकुंभाः शूद्रांघ्रिजाः॥ तत्र व

203

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२०४ धवरराश्योर्वैरेण साल्यावरस्य वर्णतो वा स्वामिदिक्कामेषा वर्णोक्तं धनेश्वराख्यसे तेषां किं तु समाहीनावाशस्यते॥ को गुणः सदृशवर्णैस्तथा वर्णेनतेनैव
दे॥ हीनवर्णे वरे मृन्यैकेष्याहुः सदृशो दलमिति॥२॥ अथ वश्यकूटमिन्द्रवज्रयाह॥ श्लो॰॥ हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जल
जा भक्ष्याः॥ सर्वेऽपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोन्यत्॥२४॥ टी॰॥ नरराशयो मिथुनकन्यकातुलाः एषां मेषाद
यः सर्वे सिंहं त्यक्त्वा वश्याः॥ ननु जलचराणां सहानवस्थानात्॥ कथं वश्यत्वं तत्राह॥ जलाश्च भक्ष्या इति॥ एषां नरराशीनां जल
जा भक्ष्याः॥ मकरकुंभमीनकर्कास्तु भक्ष्याः किं तु सर्वे वश्या इति सत्वपि नेतु शब्दः॥ सिंहस्यालिं वृश्चिकं विना सर्वे वश्याः॥
अत्र मकुलं च तुष्टदानो जलचराणां वश्यता वश्यं नराणां व्यवहारतो ज्ञेयं॥ वश्यमहावैरिभेदेन त्रिधा वरराश्योः॥ स्वीरा
श्योर्वश्यत्वे सति गुणद्वयं भक्ष्ये एको गुणः वैरे गुणाभावः॥२४॥ अथ ताराकूटमनुष्टुभाह॥ श्लो॰॥ कन्यर्क्षाद्वरभं यावत्कन्याभं वरभ
भम भादपि॥ गणयेन्नवभिः शेषे त्रीष्वद्रिभं सत् स्मृतं॥२५॥ टी॰॥ कन्याजन्मर्क्षाद्वरजन्मर्क्षं यावद्गणयेत् तथा वरजन्मर्क्षाद्धि कन्याजन्मर्क्षं
गणयेत् ततो विशिष्टे नवभिः भक्ते यद्वशिष्टं तत् त्रि पंच सप्त ७ मिते भवे तदा असत् प्रभं स्मृतं॥ अन्यथा एकद्विचतुःषड
ष्ट नवमिते चेत्तदा शुभं उभयत्रापि चेत् वृद्धिमिति शेषे तारा मैत्री वात्स्येन गुणाभावात्॥ एकत्र चेत्तदा अर्धमैत्री गुणत्रयं॥२५॥
अथ योनिकूटं शार्दूलविक्रीडितद्वयेनाह॥ श्लो॰॥ अश्विन्यंबुपयोर्हयो निगदितः स्वात्यर्कयोः कासरः सिंहो वस्वजपादयोः
समुदितो याम्यांत्ययोः कुंजरः॥ मेषो देवपुरोहितानलभयोः कर्णांबुनोर्वानरः॥ स्याद्वैश्वाभिजितोस्तथैव नकुलश्चा
न्द्राब्जयोन्योरहिः॥२६॥ ज्येष्ठामैत्रभयोः कुरंग उदितो मूलार्द्रयोः श्वा तथा मार्जारोदितिसार्पयोरथ मघायाम्योस्तथैवोन्दुरः २०४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्याघ्रो दितिद्वाभचित्रभयो रपि च ॥ बुध्न्यार्यमेद्रो हूयोः योनिः पादगयो परस्परं महावैरं भयोन्योन्यजेत् ॥२५॥ टी॰॥ अश्विनीश
तताराख्योर्हययोनिः । एवं स्वातीहस्तयोः कासारः महिषः लुलायो महिषो वाहद्विषत्कासारसैरिभा इत्यमरः ॥ कर्णश्रवणः ॥ अनुरा
धाज्येष्ठयो मर्कटः ॥ चांद्रे मृगः ॥ अश्लेषयो निर्ऋतितत्स्यमयोहिरणि तयो रहिः सर्पः ॥ कुरंगो हरिणः ॥ अनुराधाज्येष्ठयोः ॥ वि
शाभं विशाखाचित्रयोर्व्याघ्रः ॥ बुध्न्यर्हे उत्तराभाद्रपदा तयोर्गौर्योनिः अन्यत्स्पष्टं ॥ फलमाह ॥ पादगयोरिति ॥ एक
स्मिन्नुपादेवरणेन गतयोः कृत नक्षत्रयोन्योः परस्परं महावैरं स्यात् ॥ अन्यथा नेत्यर्थः ॥ यथा अश्विनेयुययो
र्हयोनिरुदितः ॥ स्वातीहस्तयोः कासारः ॥ इति पादस्तत्रोक्तयोर्भयोन्योरश्वमहिषयोर्महावैरं ॥ एवं हस्तासिं
हयोरित्यादि ॥ एतत्फलमाहाभिः ॥ एकयोनिषु संपत्तिर्दंपत्योः संगमः सदा ॥ भिन्नयोनिषु मध्यः स्यादरिभावे न चेत्तयोः ॥ योनिर
भावे नोद्वाहः सतु कार्यो वियोगदः ॥ राशीशं च यथालिकारये न्ततुदोषभाक् ॥ अत्रारिवैरोदासीने मैत्रक्रमेण गुणविभागः ॥
गोव्याघ्रादीनामतिवैरं ॥ तत्र गुणाभावः ॥ श्वनकुलमार्जारादीनां वैरं तत्रैको गुणः ॥ अश्वमेषादीनामौदासीन्यं तत्र गुणद्वयं ॥ गो
मेषादीनां मैत्रं तत्र गुणत्रयं ॥ एकयोनौ अतिमैत्रं तत्र गुणचतुष्टयं ॥२५॥ अथ शार्दूलविक्रीडितेनांशग्रहमैत्रीमाह ॥ श्लो॰
मित्राणि द्युमणेः कुजेज्यशशिनः शुक्रार्कजौ वैरिणौ सौम्यश्चास्य समो विधोर्बुधरवी मित्रे न चास्य द्विषत् शेषाश्चा
स्य समाः कुजस्य सुहृदश्चन्द्रेज्यसूर्या बुधः ॥ शत्रुः शुक्रशनी समौ च शशिनस्त्वर्कसिता हस्करौ ॥२६॥ मित्रे चास्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१५ रिपुः शशी गुरुशनी ह्यस्य जातसमा निगद्यते ॥ मित्राण्यर्ककुजेंदवो बुधसितौ शत्रू समः सूर्यजः ॥ मित्रे भौमशनी कवेः शशिरवी 206
शत्रू कुजेज्यौ समौ ॥ मित्रे शुक्रबुधौ शनेः रविशशिहमाजाः द्विषोन्यः समः ॥२७॥ टी० ॥ सूर्यस्य भौमगुरुचंद्र मित्रा
णि । शुक्रशनी वैरिणौ अथ सूर्यस्य सौम्यो बुधः समः नमस्तेने मित्रं । एवं सर्वत्र ॥ अथ पचुधौ बुधरवी मित्रे पुनरस्य
विद्यो द्विषत् शत्रुर्नास्ति ॥ मंगलगुरुशुक्रशनयः समाः एव ॥ अथ भौमस्य गुरुचंद्रसूर्या मित्राणि बुधः ॥ शत्रुः शु
क्रशनी समौ ॥ अथ शशमस्तत्रं तो बुधस्य सिताहस्करौ शुक्ररवी मित्रे बुधस्य शशी शत्रुः ॥ गुरुशनिभौमाः स
बु मा अथ जीवस्य गुरोः सूर्यभौमचंद्रा मित्राणि बुधशुक्रौ शत्रू सौरिः समः ॥ अथ कवेः बुधशनी मित्रे चंद्र थे
सूर्यौ शत्रू कुजगुरू समौ ॥ अथ शनेः शुक्रबुधौ मित्रे रविचंद्रभौमा द्विषो वैरिणः अन्यो गुरुः समः ॥ अथ
गुणविचारः ॥ तत्रैकाधिपत्ये परस्पर मित्रत्वे चत्वारः ॥ अथ समत्वे त्रयो गुणाः मित्रवैरे गुणगुणद्वयं
समवैरे एको गुणः परस्परवैरे गुणाभावः ॥२७॥ अथ गुणकूटं वसंततिलकशालिनीभ्यां चाह ॥ श्लो० ॥ रक्षोनरामरगणा
क्रमतो मघाहि वस्विंद्रमूलवरुणानलतक्षराधाः ॥ पूर्वोत्तरात्रय विधात्रयमेश भानि मैत्रादितीदुहरिपौष्णमरुल्ल
घूनि ॥२८॥ निजनिजगणमध्ये प्रीतिरत्युत्तमा स्याद्रमरमनुजयोः ॥ सामध्यमा सैप्रदिष्टा । असुरमनुज १५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योऽन्येन सुरेव प्रदिष्टोऽनुज विबुधयोस्याद्वैरमेकान्ततोऽत्र ॥२९॥ टी०॥ कमलोद्भवो नराः मरगण बाक्यत्रये एकेच्यैतेत द्वाचि
त्रानुराधाश्वि शापा एतत्पंचैतेन वसहायिरहोगणः॥ पूर्वात्रय मुत्तरात्रय विधाता रोहिणी यमो भरणी ईशा आर्द्राए
तानि भानि नरगणो मनुष्यगणः॥ मैत्र मनुराधा अदितिः पुनर्वसु इंदु मृगः हरिः श्रवणं पौष्णं रेवती मरुत्स्वाती ल
घूनि स्वाश्विनी पुष्यहस्ताः एतानि नवभानि अमरगणः॥२८॥ निजेति॥ स्वस्वगणे विद्यमानयोः स्त्रीपुरुषयोः स्वजग
णयोरत्युत्तमा प्रीतिः स्यात्॥ अमरमनुजयोः देवमनुष्ययोः॥ परस्परं प्रीतिर्मध्यमा स्यात्॥ असुरमनुष्ययोः राक्षस
मनुष्ययोः स्त्रीपुरुषयोर्मृत्युरेव प्रदिष्टः॥ प्रबलद्वेषत्वायेन मनुष्यगणस्यैव नाशः॥ शीघ्रं ये सयोरपि दुष्टत्वं
अन्यापवादमाह गणेति॥ रक्षोगणो यदि पुंसो कुमारी नरगणा भवेत् सम्यक्कृतं त्वगण प्रीति यौनिशुद्धिः शुभे तदा इति
अस्त्रेये गुणकल्पना॥ नरराक्षसो मिहद्वैरं तत्र गुणाभावः॥ देवराक्षसो वैरं तत्रापि च गुणाः॥ देवमनुष्ययो अत्वारः॥ गण
कृते षड्गुणाः॥ ५॥ अथ राशिकूट मनुष्यमाह॥ श्लोक॥ मृत्युः षडष्टके ज्ञेयो पत्यहानिर्नवात्मजे॥ द्विद्वादशे निर्धन
त्वं द्वयोरन्यत्र सौख्यकृत्॥३०॥ मृत्युरिति॥ स्त्रीपुरुषराश्योः परस्परं षष्ठाष्टमराशित्वे सति मृत्युर्भवेत्॥ए

207

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेनवात्मजेनवपंचमे चलानोहानिः॥ एवंद्विद्वादशेनिधनत्वेदारिद्र्यंस्यात्॥ अन्यत्रतत्रैकादशेचतुर्थदशमेसम सप्तके
मेवासतिसौख्यकृत्॥ पाणिपीडनेस्यात्॥ ज्यो०॥ अथास्यदुष्टकूटस्यपरिहारंशार्दूलविक्रीडितेनाह॥ श्लो०॥ मैत्रेदु
ष्टकूटकेपरिहृतिःपरत्वेकाधिपत्येशुभे॥ मैत्रंवाग्रहसौहृदेपिगदितोनाड्यंहीशुद्धियदि॥ अन्यर्क्षेशप्रयोर्बलित्वसखितै
नाड्यर्क्षशुद्धौतदा॥ ताराशुद्धिवशीचराशिवशतामावेनिरुक्तोबुधैः॥३१॥ मैत्रेति॥ स्त्रीपुरुषराश्योर्द्वयोरेकाधिप
त्येएकस्वामिकत्वेसति मैत्रेदुष्टकूटेबडष्टकाद्यवपिविवाहःशुभोगतिः॥ यथामेषवृश्चिकयोस्तुलावृषभयो
र्वा॥ नवपंचमेत्वेकाधिपत्येकस्वामिकत्वेसति मैत्रेदुष्टभावः॥ द्विद्वादशेमकरकुंभयोः॥ अथवाराशी
श्वरयोःराशिस्वामिनोःसौहृदेमैत्रेपियदिनाडीनवंशद्वयोःशुद्धिर्वेधोनभवेत्॥ तदापिदुष्टभाकूटकेविवा
हःशुभः॥ यथाबडष्टकेमीनसिंहराश्योर्नवपंचमेमेषधन्वोर्द्विद्वादशेमीनमेषयोरित्यादि॥ तथाचवसिष्ठः
द्विद्वादशेवानवपंचमेवाषडष्टकेवाप्यरिपोरितोवा॥ एकाधिपत्येभवनेशमैत्रेशुभायपाणिग्रहणंविधेय
मित्यादि॥ अन्यर्क्षेशप्रयोरिति॥ अन्यर्क्षेशेति षडष्टकादिभ्योन्यराशौराशिस्वामिनोःपरस्परंशत्रुत्वे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वास्ति॥ शुभग्रहयोर्लग्नराशिस्वामिनो वा स्वामिनो बलित्वे॥ सवितानाचप्रथमाद्विवचनोंतं पदं॥ बलित्वे स्वोच्चादिस्थितत्वेन बलित्वं पर
स्परमैत्रीतेउतचेन्द्र्वतः॥ तथा नाडयर्द्दोषदौ नाडीमहत्त्वयोर्वेधाभावे सति ताराशुद्धिवशेन सहितिनाशिवमंगला भावे राशीशवशि
त्वे च सति दुष्टमकूटे पि विवाह शुभो मिहलकगदितः॥ उक्तं च जगन्मोहने वशिष्ठेन॥ राशिनाथे विरुद्धे पि सबलत्वांशकाधिपौ
नन्मैत्रेपि च कत्र्येदंपत्योः सुखमिच्छतेति॥ अन्यत्रापि तेनैव प्रकारेणा वशिष्ठेनाक्ते॥ राशिनाथे विरुद्धे पि मित्रत्वे चांशनाथ
योः॥ विवाहः कार्य एवात्र दंपत्योः सौख्यवर्धनमिति॥ यत्रैककर्तृके स्मृतिवाक्येषु अन्यतरवाक्यापेक्षयापत्तेरुपक्रम
सेहारन्यायो न प्रवर्तते॥ तेनात्र वशिष्ठवाक्यद्वयस्याभिन्नार्थत्वं वाच्यं॥ तत्र कस्य कोर्थ इति संदेहे न्यूनार्थे द्वितीयवचने केवल
ग्रहवैरापवादकं तुल्यबलत्वात्॥ अंशनाथसबलत्वाभिधायके प्रथमवचने उभयविरोधसग्रहवैरराशिवै
रूपस्यापवादकं तेन राशिनाथे विरुद्धे इत्यत्र राशी च नाथौ च तेषां समाहारो राशिनाथं तस्मिन् राशिनाथे तथा
चायमर्थः॥ राशिविरुद्धे षडष्टकादिना नाथौ विरुद्धौ कयोरित्याकांक्षायां पत्योः षडष्टकादिविचारस्तयोरेव
सन्निहितत्वाद्ग्रहणं तयोर्दंपत्योर्नाथौ विरुद्धौ परस्परशत्रुरूपत्वात् तदंशाधिनवांशस्वामिनः सबलत्वे च सम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२ क्षितेसति विवाहः शुभः॥ नत्वस्मिन्नृक्षिके स्याद्व्याने किं मान उच्यते। अन्येनापि सबलत्वस्याधिकरणमेव॥ तत्र गुणाधिक्यं तु नस्य
वैद्विनाडीति॥ २३॥ अथ दुष्टयोगानां कूटभकूटानां परिहारं शालिन्याह॥ श्लो०॥ मैत्र्यां राशिस्वामिनोरंशनाथद्वंद्वस्यापिस्या
रा द्गुणानां न दोषः॥ खेटारित्वे नांशनाथे सभकूटं खेटद्वीतिस्यापि दुष्टभकूटं॥२३॥ मैत्र्यामिति॥ स्त्रीपुरुषयो राशिस्वामिनो
मैत्र्यां सत्यां तथा राशिनाथयोर्वा अंशनाथयोर्द्वंद्वस्यापि मैत्र्यां सत्यां दुष्टगणानां दोषो नस्यात्॥ अत्रिः॥ राशीशयोः सुहृद्भा
वे मित्रत्वे चांशनाथयोः॥ गणादिदोषोप्युद्वाहः पुत्रपौत्रविवर्द्धनः॥ अथ सद्भकूटं तृतीयैकादशादिकं खेटारित्वेत्र
ह्वैरकृते दोषेनाशयेत्॥ अथ सद्भकूटे सप्तगुणाः॥ दुष्टभकूटे गुणाभावः॥ भकूटदोषापवादे चत्वारो गुणा इति॥
अथ नाडीकूटं स्रग्धरयाह॥ ज्येष्ठारौद्रार्यमांभःपतिभयुगयुगं दास्रभं चैकनाडी॥ पुष्येंदुत्वाष्ट्रमित्रांतकवसुजलभं यो
निर्बुध्ने च मध्या॥ वाय्वग्निव्यालविश्वोडुयुगयुगमथो पौष्णभं चापरस्या दंपत्योरेकनाड्यां परिणयनमसन्मध्यना
ड्यां हि मृत्युः॥२४॥ ज्येष्ठारौद्रेत्यादि ज्येष्ठा आर्द्रा उत्तराफाल्गुनी अंभःपतिर्वरुणः शततारकाभ्यो नक्षत्रेभ्यो युगयुग
द्वयंद्वयं ज्येष्ठामूले उत्तराहस्तौ आर्द्रापुनर्वसू॥ शततारकापूर्वाभाद्रपदाः दास्रभं अश्विनी च एतन्नक्षत्रनव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

211

१ कंपरस्परं मैत्र्यं नाडीत्युच्यते ॥ अथ धनिष्ठादृतो षाडाद्यात्तुच्चमभुक्तरामाद्रुपदा एतन्न हाऽत्रनवकं परस्परं मध्यनाडीत्युच्यते ॥ अनु
पवाप्यक्तिस्माऽते विच्चोद्भुवगयुगंबायुः स्वातीतितोयुगं द्वयेस्वातीविशाखा आग्निः कृत्तिकारोहिणी आर्त्तो श्लेषामघाचविमो उ
उत्तराषाढाश्रवण श्रयोहस्तरेवतीएतन्नहाऽत्रनवकम परद्वितीयेकनाडीत्युच्यते ॥ एतत्फलमाह ॥ दंपत्योःश्रीपुरुषयोरेकनाड्यां
परिणयनमसत् ॥ मध्यनाड्यां हि निश्चयेनमृत्युर्द्वयोरपिस्यात् ॥ नारदेनतु विशेषउक्तः ॥ चतुस्त्रिंये दोत्रिभोक्ताः कन्या
यात्क्रमशो त्रिभात् ॥ वह्निमादिंदुभानाड्योस्त्रिचतुः पंचपंचसु ॥ गणयेत्सव्यपाचैकनाड्यां मृत्युर्नसंशयः ॥ एकनाडीविवाहं
फलुत्वैः सर्वैः समन्वितः ॥ वर्जनीयः प्रयत्नेन दंपत्योर्निधनं यतू इति ॥ अमुमर्थं स्पष्टमाहगर्गः ॥ चतुष्पात्कन्यकास्वर्क्षं
गणयेदाश्विनादिकं ॥ त्रिभेसव्यापसव्येन भिन्नं चपदे शुभाशुभं ॥ कन्याकर्क्षं त्रिपाच्चेत्स्यात् गणयेत्कृत्तिकादिकं ॥ चतुर्भिःपदै
भिरुक्तद्दलि जितारकान्वितं कन्यकर्क्षं हिपाच्चेत्स्यात् गणयेत्सौम्यभादिकं पंचभिस्त्वावरोहेतु पंचभोगुत्तिवर्जिते ॥ श्री
सन्नात्वेकनाडी हृसन्नमतदायिनी ॥ दूरस्थाचैकनाडी स्यात् दूरस्यातिशुकारणीति ॥ नाडीविचारेचंडेश्वरः ॥ वेधेस्वध्ये
श्रुमप्रतिभोगः क्रोडे वनितावत्तिवियोगः ॥ मध्यमरेखेभवति विवाहो उभयोर्मरणंवदति वराहः अश्व्यादिनाडीवेधस्ते
क्रमात्त्र्यहं द्वितीयकं ॥ याम्यादितुर्यंतुर्यं चकृत्तिकादिद्विपकं ॥ अन्यच्च ॥ अर्केंदुजहेत्रिणितनूजजीवाः केतुः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

212

१०८ सितेभाद्रुःशशांकसौराः जन्मादिनाडीत्रितये शुभाःस्युः शुभेशुभंस्यादशुभे शुभंस्वा तद्यथा सूर्ये २।१०।११ वुधे ३।८। मेषु ५।५।२।६।४।३।१२
के ५।११।६।१२ शुक्रे १।२।५।११।८।६ राहौ १०।११।६ शौ ५।१।८।२।१० शुभमनाडीनक्षत्रे शुभं कार्यं कुर्यात् ॥ नांशुभग्रहनाडीनक्षत्रे इत्यर्थः चतु
र्नाडीत्वस्यांयोये वेधे पंचनाडिका ॥ त्रिनाडी सर्वदेशेषु वर्जनीया प्रयत्नत इति मनुस्तु ॥ अहस्यैतु चतुर्नाडीसंयोगः कालमृत्युदः ॥
एषयोगोन्यदेशेषु अयमल्पफलप्रदः ॥ पंचनाडीसमायोगः पांचालेकालदंडदः इतरत्र समायोगोऽ
यदापि दृष्टदोषकृत् ॥ त्रिनाड्यांतु समायोगः सर्वत्रातिभयंकरः इति ॥ अथ ग्रहकृतवेधः ॥ दोषा
पनुत्तये नाड्योमत्स्यजपजपादिके ॥ विधावत्रा लग्नेष्वेवतर्पयेत्कांचनादिना ॥ हिरण्मयो
द्दहिलोचन इषादक्षिणादिकं कर्के ॥ मावोद्यवसनेहेमसर्वदोषापहारकमिति ॥ अन्यच्च
चक्राष्टके गोमिथुनेष्टदेवं कोष्ठेसरूप्येनवपंचमेषा ॥ वसंज्ञदेयेकनकं चशस्ताहि हिरा
दशौ वास्तराप्तव्यमेवेति ॥ २४ ॥ अथैंद्रवज्रया एवम ध्यापरभागयोगानि भान्याहा स्रो
वो भेमशाशाकृता द्रुसह स्वर्ये १४नेदपी पूर्वार्द्धमध्यापरभागयुग्मे ॥ भतोष्टिवः भाग्य ज्ञिसोद्वि
पः स्यान्न २४ वेदयोश्र्मवरे प्रियाखी ॥ २५ ॥ पौष्णाद्रुवत्याः धडूभं भानिजात्यभिजायमेक

नक्षत्रपर्वनाडी चतुर्नाडी पर्व त्रिपर्वनाडी

म	आ	पु	पू	अ	क	रो	म	श्रा	आ	भ	कृ
ह	उ	प	म	॰॰	म	अ	पू			पू	रे
चि	स्वा	वि	अ	ज्ये	पू	उ	ह	चि	पु	पू	अ
श्र	उ	पू	मू	॰॰	ज्ये	पू	चि	स्वा	उ	पू	म
ध	श	पू	उ	रे	म	पू	उ	अ	ह	चि	स्वा
रो	ह	म	अ	॰॰	म	भा	ध	श्र	ज्ये	अ	वि
उ	रे	अ	भ	म	पू	उ	श	ध	अ	पू	उरे

१०८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वचनं प्रत्योर्धयोर्गतिस्त्रेयानि॥ आद्यादिवादश्याम ध्यभागयोर्गतिस्त्रेयानि। मेषादीनि नव अपरभागयोर्यगतिस्त्रेयानि फलमाह भक्तो
प्रियः इति अग्रभागः। ताराम्भेतः पुरस्त्रीसमागमे गणिकादिसमागमे वा पूर्वार्द्धयुजि नक्षत्रे सति स्त्रीणां भक्तो प्रियः। मध्यमभागयुजि
भे परस्परं प्रीतिर्भवेत्। परे परभागयुजि भे स्त्रीणां प्रियो भवेदिति॥ एवं वधूवरयोः समागमेपि ज्ञेयमिति॥ रत्नमालाटीकायां महादेवे
नोक्तं॥२४॥ अथ षड्वर्गसम्पत्तं वर्गकूटमार्ये पाह॥ श्लो०॥ अकचटतपयशावर्गाः॥ खगेशमार्जारसिंहश्वनां सर्पाखुमृगावीनां निजपं
चमवैरिणमष्टौ श्लो०॥ अकचटतपयशावर्गो अवर्गः अमेशकः॥ कुचुटुतुपु ५ इति पंचवर्गाः। एकोयवर्गोन्यः शावर्गः॥ ए
वमष्टौवर्गाः। आखेयाः। यवर्गो मृगस्य। शावर्गो मेषस्य। अत्र निजात्पंचमो वैरी एणामेषां तत एवोक्तः॥ गरुडसर्पयोः मार्जा
रमूषयोः (यवर्गो मृगस्य। शावर्गो मेषस्य। अत्र निजात्पंचमः) एवमेषयोः परस्परं महावैरित्वमिति पंचपेः स्त्रीपुंसयोर्नक्ष
त्रेषु वर्गे चेत्तदा अशुभं पदान्येकवर्गे उदासीनवर्गे वा स्यात्तदा शुभं। एतच्च स्वामिसेवकयोरपि विचार्यं।२५। इदानीं नक्षत्र
राश्येकत्वे विशेषं शालिन्याह। श्लो०॥ राश्यैक्ये चेद्भिन्नमृक्षं द्वयोः स्यान्नक्षत्रैक्ये राशियुग्मं तथैव॥ नाडीदोषो नो गणानां च दोषो
नक्षत्रैक्ये पादभेदे शुभं स्यात्॥ यंधोशांते २६। राशीति। द्वयोर्वधूवरयोरेकराशित्वे सति यदि भिन्नं भं स्यात्। नाडीदोषो गणा
नां च दोषो न स्यात्॥ यथाश्लतारा पूर्वाभाद्रपदापादत्रये चतुर्थचरणस्य॥ अत्रापि विशेषमाह गर्गः। एकराशौ पृथक् धि
ष्ण्ये पुंसस्तारा प्रथमा भवेत्। अतीव शोभना प्रोक्ता स्त्रीतारा चेदशोभना। अथैकराशिनक्षत्रे केष्वपवादमाह॥ नक्षत्रैक्ये इति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वध वनयोः राशेर्यैकेस्वयद्वि चरणे भे दस्तदापि शुभं स्यात्॥ जन्मनलेनामानेअधायमाह॥ वसिष्ठः॥ स्वज्ञातजनोनक्षत्रे नामभे परिकल्प
न। तेनैव चिंतयेत्सर्वं राशिकूटादि जन्मवत्॥ जन्मभं जन्मधिष्ण्येन नामधिष्ण्येन नामभं॥ व्यत्ययेन यदा योज्यं दंपत्योर्निधनप्रद
मिति॥ रुद्रः॥ सेवकादिस्वदेशस्वाम्यादि मालायैदेवि योषा॥ वसंततिलक प्राह॥ श्लो०॥ सेव्याधमर्णे युवतीनगरादिकं भे चेन्नृवहिमय
धनिमल्लेपुरादिषस्यात्॥ सेवाविनाशधननाशनमृत्युनाशग्रामादिसौख्यहृदिके क्रमशः प्रदिष्टं॥ तथा चोक्तं डामरसंग्रहे॥ मा
मितिजन्मनक्षत्राद्वितीयं पतिजन्मभं॥ नश्यते भर्तृनाशाय कथितेन्न संशयः॥१॥ प्रथमं सेव्यनक्षत्रं द्वितीयं सेवकस्य च॥
नसेवास्थिरा तस्य जलबुद्बुदवर्त्तजा॥२॥ स्वर्णग्राहकजन्मर्क्षं प्रथमे स्वर्णदस्य भं॥ द्वितीये स्वर्णसंबंधो न कर्त्तव्यः कदा
चनः॥३॥ कदाचिद्व्यलोभेन क्रियते नैव लभ्यते॥ पार्वत्याश्रवणेनाथेन प्रोक्तं डामरसंग्रहे॥४॥ ग्रामभं प्रथमे यस्य द्वि
तीयं जन्मभं भवेत्॥ व्याधिः सर्वप्राप्नोयतः प्राणार्थनाशदं इति॥५॥ अथ राशीस्वामिनो मेनुभाषिणपाह श्लो०
कुजशुक्रसौम्य शशि सूर्यचंद्रजाः कवि भौम जीव शनि सूरयो गुरुः॥ इत्यादि या क्रियमगाप्यतो लिकेंदुमेतो नवांशविधि
रुच्यते॥ वृषे॥ [illegible] कपेति॥ क्रियो मेषः मृगास्यमकरः तौलि कस्तुल दंडं कुंभ कर्क०॥ राशीस्वामि वृषे नवांश।
विधिरुच्यते॥ मेषमेषादेः वृषे मकरात् मिथुने तुलात्॥ कर्कटे कर्कादेव॥ एवं सिंहे मेषात्॥ एवं कन्यादिषु मकरादि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुंभकर्कादिस्य एव वा एवं धनूराश्यादिकुमेषादिस्य एव ॥२६॥ अथ होरां गायत्रीछंदोभेदेन माषावादनावृत्तेनाह ॥श्लो० ॥स
समगृहमध्ये राशिद्विहोरा विषमभमध्ये रविशशितोः स्यात् ॥२७॥ पंचदशभागमिते के काहोरां। ततः प्रथम स्थिरराशिमध्ये प्रथमा
चंद्रस्य द्वितीया सूर्यस्य विषमराशिमध्ये प्रथमा रवेः द्वितीया चंद्रस्येत्यर्थः ॥२८॥ अथ त्रिंशांशान् द्रेष्काणांश्च वसंततिलकयाह 215
श्लो० ॥शुक्रज्ञजीवयमभूमिसुतस्य याता एते पंच विंशांशाः समराशिमध्ये ॥ त्रिंशांशकौ विषमभे विपरीतमस्माद्द्रेष्का
णकाः प्रथमपंचनवाधिपानां ॥२९॥ टी०॥ समराशिमध्ये क्रमेण प्रथमतः पंचांशानां ५ शुक्रः स्वामी ततः सप्तांशानां ७ बुधः
ततो ८ गुरुः ततः ५ शनिः ततः भौमः विषमे तु यस्मात्तस्य राशौ विपरीतं ज्ञेयं। प्रथमं पंचांशानां भौमः ततः ५ शनि ततो ८ जी
वः ततो ७ बुधः ततः ५ शुक्रः अथ त्रिंशांशाकसंज्ञः द्रेष्काणका इति॥ तत्र प्रथमदशांशानां प्रथमः १ विंशतिभागपर्यंतं द्वि
तीयः सूर्यस्य २ ततः दशांशाः ३ क्रमेण प्रथमपंचमनवमाधीश्वराणां ज्ञेयाः ॥ यथा मेष प्रथम द्रेष्काणे भौमस्य
द्वितीयः सूर्यस्य तृतीयः गुरोरिति ॥३०॥ अथ द्वादशांशान् दुर्गैः सह एव वसंततिलकयाह ॥श्लो०॥ स्यात् द्वादशांशा ड
स्वराशितश्च गृहहोराद्रेष्काणनवमांशकं सप्त भागाः ॥ त्रिंशांशकस्य षडिमे कथितास्तु वर्गाः सौम्यैः शुभं भवति चा
शुभमेव पापैः ॥३१॥ इह षड्वर्गेषु द्वादशांशाः राशितः स्वराशेरेव सार्धभागद्वयमितकोऽस्ति मेषस्य मेषादिः वृषस्य वृ
षादिरित्यर्थः ।गेहहोराद्रेष्काणः नवमांशाः द्वादशांशाः इमे षड्वर्गाः कथिताः एते वर्गाः सौम्यग्रहाणां चेद्भवंति तत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दाम्भुभं पापानां चेच्छुभं मिश्रं स्याद्देदघि कवर्गस्य इत्यं प्रकृते। अत्र तारकादि सिद्धैकविंशति महादोषा उक्ताः। तत्राद्यं पंचांगशुद्धिरहि
तो दोषस्त्वाद्य उक्तः कीर्तिताः। उदयास्तशुद्धिरहितो द्वितीयः स्पष्टः संक्रमः। तृतीयः पापषड्वर्गः भृगुः षष्ठः कुजोष्टमः गंडांतकर्त्त
री रिःफ षडष्टमस्थ ग्रहः। दंपत्योरष्टमे लग्ने राशिर्विषघटितथा दुर्मुहूर्त्तो वारदोष खार्जूरिकसमांघ्रिभं। ग्रहणोत्पा
तभं क्रूरविद्धं तौ क्रूरसंयुतं। कुनवांशो महापातो वैधृति स्त्वेकविंशति रिति॥ अन्ये त्वेमहादोषा उक्ताः वेधस्तलत्ता
च तथा च पातः खर्जूर-योगो दशयोगचक्रं पुनश्च यामित्रमुपग्रहाश्च बाणा मह्यवर्योर्दश चैव दोषा इति। अथ
ग्रंथ चक्रे कृता लत्ता एकार्गल चक्र व्याख्या दोष नामानि नोक्तानि॥ तत्र पंचांग शुद्धि दुर्मुहूर्त्तोवार दोष ग्रहणोत्पा
त नक्षत्र दोषा आद्येष्वाशुभप्रकरणे निरूपिता एवेति पुनर्नोच्यते। दुर्मुहूर्त्तवार दोष योः पुनरभिधान प्रयोजनं
तत्रैव वक्ष्यमाणं॥ अतोन्ये दोषा निरूप्यंते। तत्र पापषड्वर्गाख्यो दोषः कुजभुक्ते त्यादि मिश्र श्लोके निरु
क्तः। अथ गंडांत दोषं शार्दूल विक्रीडितेनाह॥ श्लो॥ ज्येष्ठा पौष्ण भसार्प्य भांत घटिका युग्मं च मूलाश्विनी॥ पि
त्र्यादौ घटिका द्वयं निगदितं तद्गंडतं कर्कालिमीनभाजभांततो हि घटिका त्रिहापदमे प्यादिगा॥ हस्तांते घटिका
त्मकं त्वशुभदं नेतादि षष्ठ्यादिगा॥४०॥ ज्येष्ठेति॥ गंडांतनामविशेषः। सचानेकविधः। नक्षत्रतिथिलग्नसं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धिः ॥ तथा योगकरणवर्षोपनंतु मासदिनरात्रिमध्यान्हप्रातःसायंनिशानामप्यस्ति । धेर्वेति । तत्र नक्षत्रतिथिलग्नसंधिर्गंडांत
संज्ञकमुच्यते ज्येष्ठापौष्णमेरेवतीसर्पभमघाख्यो वा एतेषामंते घटिकाद्वये तथा मूलाश्विनीमघानामादौ घटिकाद्वयेन नक्षत्रगंडां
तं ज्ञेयं । यथा रेवत्यश्विन्योः श्लेषामघयोर्ज्येष्ठामूलयोश्च तदंतरालवर्त्ति चतुर्घटीनक्षत्रगंडांतमशुभमित्यर्थः ॥ अथ लग्नगंडां
तं कर्केति ॥ कर्कः अलिर्वृश्चिकः झषस्तो मीनः । मीनांते सादि एषां ऽजहयमिथानानाम् ॥ एषां लग्नानामंते तथा तेषामादौ
द्वघटिका तथा सिंहमेषौ प्रसिद्धौ ॥ अन्यो धनुः । एषां लग्नानामादौ तो द्वघटिका लग्नगंडांते । यथा कर्कसिंहयो
र्मीनमेषयोर्वृश्चिकधनुषोश्चांतरालवर्त्ति एका घटिका लग्नगंडांतमशुभमित्यर्थः एतदंते इति पूर्णाः ५।१०।१५। आ
सामंते घटिकैका तथा नंदा १।६।११। एतासामादिमन घटिकैका तिथिगंडांते नाम ॥ यथा पंचमीषष्ठ्योर्दशम्येकादश्योः पं
चदशीप्रतिपदोश्चेति द्वयोरंतरालवर्त्ति घटीद्वयं तिथिगंडांतमशुभमित्यर्थः ॥ एवं गंडांतसंज्ञः संधिरुक्तः । अथान्यविसंध्योविशेषेणो
क्तः । पक्षांतसंधिषिर्द्वितिं च माससंधिस्थिनाड्यः खलु संध्ययोश्च । नाड्यश्च नक्षत्रतिथिसल्लयोगसंधिस्तदर्धं करणस्य
संधिः ॥ पक्षांते पुत्रनाशः स्यान्मासांते धनक्षयः । वर्षांते वंशनाशः स्यात् गुरुणा सर्वनाशनमिति ॥ आवश्यकत्वे तु ।
नक्षत्रयोगतिथिसंधिषु नाडिकैका तिथ्यष्टविंशति पलैः सहिता भयत्र । कर्कालिमीनधनुसंधिषु द्विकुपला निषिद्धा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२१९ षष्ठिविवेकेषु पंचमे चेति वासनां केशवार्कवाक्यमनुसर्त्तव्यं गंडांतपरिमाह वशिष्ठः ॥ गंडांतदोषमखिलं मुहूर्त्तोभिजिनाकृयः ॥ हे
ति यद्वन्मार्तंडस्त्वा धं पहितेसे घमिवाखिलं ॥ ५० ॥ अथ कर्तरीदोष मनुष्टुभमाह ॥ श्लो० ॥ लग्नात्पापावृज्वनृज्वौ व्ययाधसंस्थौ य
दा तदा ॥ कर्त्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदा ॥ ५१ ॥ लग्नादिति ॥ यदा पापग्रहोऽनृज्वनृज्वौ लग्नाद्व्ययपापैस्थौ द्वाद
शस्थः पापग्रहोऽनृजुर्मार्गी द्वितीयस्थः पापो नृजुर्वक्री स्यात्तदा कर्त्तरी नाम दोषः स्यात् ॥ मृत्युदारिद्र्यशोकदा भवेत्
कर्त्तरीकारको ग्रहो ऽभावयेत् किंतु शीघ्रगो ऽधात्तदा कर्त्तरीनेत्याह ॥ वशिष्ठः ॥ तावेव शीघ्रो यदि वक्रचारी
न कर्त्तरि चेति पितामहोक्तिरिति ॥ इयं कर्त्तरी चेद्दृष्टा पिंडदृष्ट्या ॥ कश्यपः ॥ चंद्रस्य कर्त्तरीतत्र शुभदृष्टा न दो
षदेति ॥ परं तु लग्नस्य चंद्रस्य वा क्रूरमध्यगतत्वदोषोस्त्येव ॥ कर्त्तरीस्वल्पफलः कन्यानाशकरः क्रूरमध्यगते
लग्ने चंद्रे वा करग्रहणं तेषम सदन्नाशि मृत्युं गमनं च शंतिकेन्यायां इतिषेलैः ॥ कर्त्तरीदोषापवादमंगेनापि स्व
यं वदति ५२ अथ सग्रहदोषमनुष्टुभमाह ॥ श्लो० ॥ चंद्रे स्त्र्ये ककोदव ॥ एवं सिंहे मेषात् ॥ एवं कन्यादि कुंभकरा २१९

218

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यो स्विंयुते दारिद्र्यं मरणं शुभं ॥ सौरक्षेत्राधिपत्ये वैराग्ये पापद्वययुते मतिः ॥४३॥ राशी॰ ॥ चंद्रे स्वक्षेत्रादिसंयुते मरणादिफलं क्रमेण
स्यादित्यर्थः ॥ पापद्वययोगे चेंद्रस्य मतिः स्यात् ॥ नारदादिभिर्बुधगुरुसाहित्यफलं शुभमुक्तं ॥ श्रीपतिः ॥ शुभं वदंतोति
मदिस्यविद्यामिति वसिष्ठः ॥ दारिद्र्यं रविणा कुजेन मरणं सौम्येन नस्युः प्रजाः ॥ दौर्भाग्यं गुरुणा सितेन सहिते चंद्रे 219
सुसापत्न्यकं ॥ उग्रस्तार्कसुतेन सेंदुजगुरौ नेष्ठेति केचित् शुभं ॥ पापैर्मस्युरसाग्रहैः शशियुते दीर्घः प्रवासः शुभैरिति
एतत्परिहारो नारदेनोक्तः ॥ स्वक्षेत्रगस्योच्चगो वा मित्रक्षेत्रगते यदि ॥ युतिदोषाय न भवेद्दंपत्योः श्रेयसे तदेति ॥ अथाष्टम
लग्नदोषस्यापवादमनुष्टुभाह ॥ श्लो॰ ॥ जन्मलग्नभयोर्मृत्युराशौ नेष्टः करग्रहः ॥ एकाधिपत्ये राशीशमैत्रे वा नैव दोषकृ
त् ॥४४॥ जन्मेति ॥ जन्मलग्नराशिसंबंधिनि मृत्युराशौ विवाहलग्ने करग्रहो नेष्टः अत्र जन्मलग्ने जन्मराशौ च वि
शेषमाह ॥ नारदः ॥ जन्मराश्युदमो नैव जन्मलग्नोदयः शुभः तयोरुपचयस्थाने यदि लग्नगते शुभे अष्टमलग्ना
पवादमाह एकेनेति ॥ जन्मराशिजन्मलग्नयोरष्टमस्य विवाहलग्नस्य च स्वाम्यैक्ये सति ॥ यथा मेषवृश्चिकयोः त
था नयो राशीश्वरयोर्मैत्रे यथा सिंहमीनयोः ॥ एतादृशे विषये दोषो न स्यात् ॥४५॥ अथोक्तराशौक्तमेवार्थं स्पष्ट

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

११२

उपजातिकयाह पद्यो॥ मीनोक्षकर्कालिमृगाङ्गिनायोष्टमलग्नेयदानाष्टमगोहदोषकृत्॥ अन्योन्यमित्रत्ववशेनभावधर्मे
वेस्तुतापुत्रसौख्यभागिनी॥४४॥ उदाहृतपक्षःस्त्रीकन्याएतेराशयोयद्यष्टमलग्नेस्युस्तदाष्टमलग्नंदोषकृन्नभवेत्॥ १
यथासिंहान्मीनइत्यादि। कुजइत्याह॥ अन्योन्येति॥ प्रागुक्तःपरस्परप्रीतिवशेन एकाधिपत्यवशेनच एवंसतिभाव
धर्मरिणीतासुताद्गेहे सौख्यभागिनीस्यात्॥ परिहारांतरमाह॥ गुरुः॥ लग्नादष्टमस्थासीशकेंद्रगःशुभवीक्षितः॥
यद्यष्टमलग्नोत्थदोषमाशुव्यपोहति॥ रंध्रेशःस्वशुभेशास्यःहंगस्वदेवमित्रगः॥ अष्टमस्थानदोषोहि विनश्य
तिनसंशयः॥४४॥ अथान्यदपि विचित्रछंदसाहपद्ये॥ मृतभवनाधीशोयदिचविलग्नेस्यात्तदधिपतिर्वीनशुभ
करःस्यात्॥ व्ययभवनेयदासंभवितितदंशास्तदधिपतिर्वाकलहकरःस्यात्॥४५॥ अष्टमभवनाधीशोयदिलग्नेस्याद
थवाष्टमभवनस्वामी विलग्नेस्यात्तदाशुभकरोनस्यात्॥ अथव्ययभवने जन्मलग्नजन्मराशिभ्योद्वादशे
भवने। अथव्ययभवनेशः॥ अथवाव्ययस्वामीयदिलग्नेतदाकलहकृत्स्यात्॥ कश्यपः॥ दंपत्योरष्टमिलेस्यां
तेकलेरायोवापितदंशके॥ तदीशोवालग्नगतेतयोर्मृत्युर्नसंशयः॥ इतितदीप्रवेशे विवाहलग्नगेनैस्वनित्य

११२

220

स्यात्कालहोरिति॥ ४५॥ खचामैः॥ ५०॥ नोन्यादिति वन्हि पित्र्यमेखवेदस्तः ४ केरदतस्त्र ३२ साप्येमेखबाणतो ५० श्चेघतिरन नोर्ध
मोवुपेकतेर भगात्वक्षमजी वविश्वभे ।४६॥ मनो २४ र्द्दि देवा निल सोम्य शाक्रमे कुपक्षनः २१ शोनकरा २४।२६ ष्ठिजोयमेवुगा
श्विनो२४ वुध्नमतोयपाम्यमे खचेद्रतो १० मित्रभवा सवस्तुतो ४७॥ मूलेंगवाश्या ५६ छिप नाडिकाकला ४ वज्यौः शुभेषो वि
षनाडिकाघ्रुवाः॥ निघ्ना भयोगेन खतर्क ६० भाजिताः स्पष्टा भवेयुर्विषनाडिकास्ताः ।४८॥ टी०॥ खरामेति रेवती पुन
र्वसुकृत्तिकामघाभेषु खरामतास्त्रिंशद् घटिकाः विषनाडिकाः शुभेकार्ये वर्ज्याः स्युरिति तिलोयस्पोके नान्वयः॥ एवं सर्वे
त्रव्याख्येयं। केचित्तु एषां अजमेषकी भाद्रपदायांते देवे षष्ठि घटिकालभेकेन दत्ते भभोगे ध्रुवकाउक्तान्यूनाधिकते
स्पष्टीकरणमाह पोडुति विषनाडिकाः खबामतएवमाद्योड्ड पनदत्तभेगेन निघ्नाः खतर्कैः षष्ट्या भाजिताः सन्तः (
विषनाडिकाः स्पष्टाः भवेयुः॥ तथा विषनाडिकाः अपि भभोगेन निघ्नाः षष्ट्या भाज्याः लुब्धाः स्पष्टा भवेयुरित्यर्थः
परिहारमाहन्नृ तः॥ चंद्रो मिषघटीदोषंहंतिकेंद्र त्रिकोणगः लग्नं विना शुभैः दृष्टः केंद्रे वालग्नपश्चपेति॥ वि
षनाड्युत्थितं दोषं हंति सौम्यर्द्दलगः शशी॥ मित्रदृष्टो पवास्त्वीयवर्गस्योलग्नगे पिवादेवस्मनोहरे॥ ति
थिवारयोगे रवि विषघटिकाउक्ताः॥ तिथीपुनागाद्रिगिरीषुवार्थयोगजादिकावकविष्वबासवाः॥ मु

2·21

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२२२
मु॰

नीमर्त्यचक्राः प्रथमातिथिः क्रमात्तारे विबिंबस्याद्घटिकाचतुष्टयं १५।५।८।७।७।५।४।८।७।१०।३।१३।१४।७।८। नरवाहवंबाहपादिक्षरी
लावाणक्षतस्यानिपपाः क्रमेण सूर्यादिवारे घपरंचतत्रो नाड्यो विषं स्यात्परिवर्जनीयं॥ २०।२।१२।६।७।५।४॥ अथमुहूर्तदो
षविवत्सुरादे दिवामुहूर्त्तानाह ॥ श्लो॰॥ गिरिशमानुजगमित्राः पित्र्यवसूंबुविश्वेभिजिदथचविधानापीदुइंद्रानलौ च॥ ति

अ	भ	कृ	रो	मृ	आ	पु	पु	श्ले	म	पू	उ	ह	चि	स्वा	वि	अ	ज्ये	मू	पू	उ	श्र	ध	श	पू	उ	रे	अथनक्षत्रविषघटिका
५०	२४	३०	४०	१४	२१	३०	२०	३२	३०	२०	१८	२१	२०	१४	१४	१०	१४	५६	२४	३०	२०	१०	१८	१६	२१	३०	३० ध्रुवकाः

१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	तिथयः
१५	५	८	७	७	५	४	८	७	१०	३	१३	१४	७	८	ध्रुवकाः

अथवारविषघटीचक्रम्।

सू	चं	मं	बु	बृ	शु	श	ग्रहाः
२०	२	१२	९	७	५	४	ध्रुवकाः

थ्यतिरुद्रक्रतो योपथ्येमापोभगाः स्युः। क्रमतइहमुहूर्त्तावासरेवाण चंद्राः॥ ४२॥ मालिनी॥ गिरिशेति॥ ग्र
पवाण चंद्राइत्युक्तेमुहूर्त्तास्तपापोक्तेन तल्लदाण ज्ञेयाः॥ इंद्रानलौ इंद्राग्नी एतेवासरेपंचदशमुहूर्त्ताः
स्युः॥ ४२॥ अथरात्रिमुहूर्त्तानमनुष्टुभाह॥ श्लो॰॥ शिवाजपादादष्टौस्युर्भेशाग्न्यादितिजीवको।
विष्ण्वार्कत्वष्टमरुतो मुहूर्त्ता निशिकीर्तिताः॥ ५०॥ शिवेति॥ अथदृष्टेमुहूर्त्तेष्वाद्यो शिव एव एवाततो जपादष्टौ मेशादयः स्युः
तथाजपादः अहिर्बुध्न्यः पूषाश्विनौ यमः अग्निर्ब्रह्मासोमः इत्यष्टौ ततो दशम मुहूर्त्तेप्रोदितः जीवत्वजीव क्रोमु
रुतः॥ विष्ण्वर्कत्वष्टमरुतः प्रसिद्धाः॥ एते शिवमुहूर्त्ताः प्रकीर्तिताः॥ अत्र पंचदशो भागो मुहूर्त्तो ष्यतथानिशीथितक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्यवोक्तेः॥ अथ कुमुहूर्तान् भुजंगप्रयातेनाह॥ श्लो०॥ रवावर्यमा ब्रह्मरक्षश्च सोमे कुजे वह्निपित्र्ये बुधे चाभिजित्स्यात्॥ गुरौ तोयरक्षो भ
गो ब्राह्मपित्र्ये शनावीशसर्पौ मुहूर्ता निषिद्धाः॥ ५१॥ रवौ अर्यमा मुहूर्तो निषिद्धः अन्यत्स्पष्टं॥ अथ वेधविवाहविहितनक्षत्रादि
कमभिजिन्नामेन च प्रहरं एणाह॥ श्लो०॥ निर्वेधे शशिकरमूलमैत्रपित्र्यब्राह्मान्त्योत्तरपवनैः शुभो विवाहः॥ रिक्ताममरहिततिथौ शुभे 223
ह्निवैश्वप्रान्त्योघ्रि श्रुतितिथिभागतोभिजित्स्यात्॥५२॥ टी०॥ वेधरहिते मघादिनक्षत्रे विवाहः शुभः॥ रिक्तेति॥ रिक्ता मा ३ वर्जि
ततिथिषु शुभे न्हि शुभग्रहवारे विवाहः शुभः॥ अभिजिल्लक्षणमाह॥ अथेति॥ वैश्वमुत्तराषाढा तस्य श्रान्त्यो घ्रिश्चतुर्थचरणः
श्रुतेश्च वणस्य तिथिभागः पंचदशांशो मिलित्वाभिजिन्नाम भागः स्यात्॥ ५३॥ अथ वेधं पंचशलाकाचक्रे धारयेद्वे
धं शार्दूलविक्रीडितेनाह॥ श्लो०॥ वेधोन्योन्यमसौ विरंच्यभिजितोर्याम्यानुराधर्क्षयोर्वैश्वेन्द्वोर्हरिपित्र्ययोर्ग्रहकृतो
हस्तोत्तराभाद्रयोः॥ स्वातीवारुणयोर्भवेन्निर्ऋतिभादित्योस्तथाग्न्यर्यमयोः खेटे तत्र गते तुरीयचरणे प्राद्यातृतीयद्वयोः॥५४
टी०॥ विरंच्यभिजितोर्ग्रहकृतो वेधोन्योन्यं भवेत्॥ रोहिण्यां स्थिते ग्रहेभिजिद्विद्धः अभिजित्स्थिते रोहिणी विद्धा। एवं सर्वत्र व्याख्ये
यं॥ चरणवेधमाह॥ खेटइति। न च तस्मिन्नक्षत्रे विद्यमाने ग्रहे सति। यदि चतुर्थे पादे स्थितस्तदा परनक्षत्रस्य प्रथमपादे वेधः। य
दि प्रथमे तृतीयपादे पतितः तदा द्वितीयचरणस्य वेधः सौम्यग्रहपर एव। नारदः॥ एवं यदा द्वितीयपादे तृतीयपादस्य वेधः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

११८ पद्विश्वमेषादेततः चतुर्थपादस्य वेधइत्यर्थः॥ अश्वियेच रेवत्यां वेधः सौम्यस्य हस्तपरएव॥ नारदः॥ पादमेवपरमैर्विद्धमपु मैनेव
कृत्स्नं तदितिकश्यपः॥ क्रूरविद्धयुतं धिष्ण्यं क्रूराक्रांतं च कृत्स्नमे॥ मणिहेममये हर्म्ये भूतलाक्रांतमिव त्यजेत्॥ इतिश्री
पतिः वधप्रवेशने दाने वरणे पाणिपीडने॥ वेधः पंचशलाकाख्योन्यत्र सप्तशलाकके इति॥ ज्योतिर्निबंधे गर्गः॥ मघाया
प्रथमे पादे मूलस्य प्रथमे तथा॥ रेवत्याश्चतुर्थांशे विवाहः प्राणनाशनः॥ इति॥ तद्दुंडांतपरं ज्ञेयं॥५४॥ अथ विवाहदव
त्रयस्योपवीतादौ कोशि विवाह इति सप्तशलाकाचक्रमेव वेधे वज्योत्कादस्य दर्थं वन्यासे विशेषसप्तशलाकावेधः शार्ङ्ग्स
विक्रीडिते नाह॥ श्लो०॥ प्राक्ष्येधतमानिले जलशिवे पौष्ण्यार्यमर्क्षे वसुद्वीवे च सधौम्यमहस्त मगेसापौजराधे तषणा॥
